तत् किं करोमि ? कथं स मे वध्यो भवति। इति विचिन्त्य वानरपार्श्वमगमत्। वानरोऽपि चिरादायान्तं तं सोद्वेगमवलोक्य प्रोवाच "भो मित्र! किमद्य चिरवेलायां समायातोऽसि ? कस्मात् साह्लादं न आलपसि? न सुभाषितानि पठसि?" स आह - "मित्र ! अहं तव भ्रातृजायया निष्ठुरतरैर्वाक्यैरभिहितः – भो कृतघ्न ! मा मे त्वं स्वमुखं दर्शय, यतः त्वं प्रतिदिनं मित्रम् उपजीवसि न च तस्य पुनः प्रत्युपकारं गृहदर्शनमात्रेण अपि करोषि। तत् ते प्रायश्चित्तमपि नास्ति। उक्तञ्च-

**ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे।**
**निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः॥**

तत् त्वं मम देवरं गृहीत्वा अद्य प्रत्युपकारार्थं गृहमानय। नो चेत् त्वया सह मे परलोके दर्शनम्"। तत् अहं तया एवं प्रोक्तः तव सकाशमागतः। तत् अद्य तया सह त्वदर्थे कलहायतो मम इयती वेला विलग्ना। तत् आगच्छ मे गृहम्। तव भ्रातृपत्नी रचितचतुष्का प्रगुणितवस्त्रमणिमाणिक्याद्युचिताभरणा द्वारदेशबद्धबन्दनमाला सोत्कण्ठा तिष्ठति। मर्कट आह - "भो मित्र! युक्तमभिहितं मद् भ्रातृपत्न्या।"

उक्तञ्च -

**ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।**
**भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥**

परं वयं वनचराः, युष्मदीयञ्च जलान्ते गृहम्, तत् कथं शक्यते तत्र गन्तुम्, तस्मात् तामपि मे भातृपत्नीमत्र आनय येन प्रणम्य तस्या आशीर्वादं गृह्णामि। स आह - "भो मित्र! अस्ति समुद्रान्तरे सुरम्ये पुलिनप्रदेशेऽस्मद्गृहम्। तन्मम पृष्ठमारूढः सुखेन अकृतभयो गच्छ"। सोऽपि तच्छ्रुत्वा सानन्दमाह "भद्र! यदि एवं तत् किं विलम्ब्यते त्वर्य्यताम्। एषोऽहं तव पृष्ठमारूढः। तथानुष्ठितेऽगाधे जलधौ गच्छन्तं मकरमालोक्य भयत्रस्तमना वानरः प्रोवाच - "भ्रातः! शनैः शनैर्गम्यताम्। जलकल्लोलैः प्लाव्यते मे शरीरम्"। तत् आकर्ण्य मकरः चिन्तयामास। "असौ अगाधं जलं प्राप्तो मे वशः सञ्जातः, मत्पृष्ठगतः तिलमात्रमपि चलितुं न शक्नोति। तस्मात् कथयामि अस्य निजाभिप्रायं येन अभीष्टदेवता स्मरणं करोति"।



आह च - "मित्र! त्वं मया वधाय समानीतो भार्य्यावाक्येन विश्वास्य। तत् स्मर्य्यतामभीष्टदेवता"। स आह - " भ्रातः! किं मया तस्याः तवापि च अपकृतम् ? येन मे वधोपायः चिन्तितः"। मकर आह - "भोः! तस्याः तावत् तव हृदयस्य अमृतमयफल-रसास्वादनमृष्टस्य भक्षणे दोहदः सञ्जातः, तेन एतदनुष्ठितम्"। प्रत्युत्पन्नमतिः वानर आह - "भद्र! यदि एवं तत् किं त्वया मम तत्र एवं न व्याहृतम् ? येन स्वहृदयं जम्बूकोटरे सदा एव मया सुगुप्तं कृतम्। तद् भ्रातृपत्न्या अर्पयामि। त्वया अहं शून्यहृदयोऽत्र कस्मात् आनीतः?" तदा आकर्ण्य मकरः सानन्दमाह - "भद्र! यदि एवं तदर्पय मे हृदयं येन सा दुष्टपत्नी तद्भक्षयित्वा अनशनादुत्तिष्ठति। अहं त्वां तमेव जम्बूपादपं प्रापयामि"। एवमुक्त्वा निवर्त्त्य जम्बूतलमगात्। वानरोऽपि कथमपि जल्पितविविधदेवतोपचारपूजः तीरमासादितवान्। ततश्च दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारुढः चिन्तयामास "अहो ! लब्धाः तावत् प्राणाः। अथवा साधु इदमुच्यते -

**न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।**
**विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥**

तन्मम एतदद्य पुनर्जन्मदिनमिव सञ्जातम्। इति चिन्तयमानं मकरमाह - "भो मित्र! अर्पय तत् हृदयं यथा ते भातृपत्नी भक्षयित्वा अनशनादुत्तिष्ठति"। अथ विहस्य निर्भर्त्सयन् वानरः तमाह - "धिक् धिक् मूर्ख! विश्वासघातक! किं कस्यचित् हृदयद्वयं भवति ? तदाशु गम्यतां जम्बूवृक्षस्य अधस्तात्, न भूयोऽपि त्वया अत्र आगन्तव्यम्। उक्तञ्च यतः -

**सकृद्दुष्टञ्च यो मित्रं पुनः सन्धातुमिच्छति।**
**स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा॥**

तत् श्रुत्वा मकरः सविलक्षं चिन्तितवान् "अहो! मया अतिमूढेन किमस्य स्वचित्ताभिप्रायो निवेदितः तद्यदि असौ पुनरपि कथञ्चिद्विश्वासं गच्छति, तद्भूयोऽपि विश्वासयामि"। आह च - "मित्र ! हास्येन मया तेऽभिप्रायो लब्धः । तस्या न किञ्चित् तव हृदयेन प्रयोजनम् । तत् आगच्छ प्राघुणिकन्यायेन अस्मद्गृहम् । तव भातृपत्नी सोत्कण्ठा वर्तते।" वानर आह - "भो दुष्ट! गम्यताम् अधुना नाहमागमिष्यामि ।" उक्तञ्च -

**बुभुक्षितः किं न करोति पापम्, क्षीणा जना निष्करुणा भवन्ति ।**
**आख्या हि भद्रे प्रियदर्शनस्य, न गङ्गदत्तः पुनरेति कूपम्॥**

न कश्चित् कस्यचिन्मित्रं, न कश्चित् कस्यचिद्रिपुः।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

## शब्दार्थाः

| | |
|---|---|
| कस्मिंश्चित् | कुत्रचित् |
| समुद्रोपकण्ठे | समुद्रतटे |
| प्रतिवसति स्म | निवसति स्म |
| तरोरधः | वृक्षस्याधः |
| सलिलात् | जलात् |
| अभ्यागतः | आगतः(अतिथिः) |
| अमृततुल्यानि | अमृतसमानानि |
| गोष्ठी | मेलनम् |
| कालं नयन्तौ | कालं यापयन्तौ |
| भक्षितशेषाणि | भुक्त्वा अवशिष्टानि |
| परमसुहृद् | परममित्रम् |
| अभिहितम् | उक्तम् |
| भक्षयित्वा | भुक्त्वा |
| प्रत्युत्पन्नमतिः | बुद्धिमान् |
| भुनज्मि | भोगं करोमि |
| व्यापादयितुम् | मारयितुम् |
| आह | अब्रवीत् |
| अनुरागतः | अनुरागात् |
| वल्लभा | प्रियतमा |

| | |
|---|---|
| कृतं विद्धि | कृतसङ्कल्पं जानीहि |
| पार्श्वमगमत् | समीपं गतवान् |
| चिरायान्तम् | प्रतीक्षा |
| सोद्वेगम् | कौतुकेन |
| चिरवेलायाम् | विलम्बेन |
| साह्लादम् | आनन्देन |
| आलपसि | वदसि |
| भातृपत्न्या | भ्रातृजायया |
| उपजीवसि | आश्रयसि |
| विलग्ना | लग्ना |
| आभरणा | आभूषणम् |
| द्वारदेशबद्धः | द्वारे बद्धः तोरणः |
| समुद्रान्तरे | समुद्रस्य अन्तः |
| त्वर्य्यताम् | शीघ्रं क्रियताम् |
| समानीतो | आनीतः असि । |
| अपकृतम् | अपकारं कृतवान् |
| व्याहृतम् | कथितम् |
| दीर्घतरचङ्क्रमणेन | दीर्घतरकूर्दनेन/दीर्घोत्प्लवनेन |
| निकृन्तति | नाशयति |
| प्राघुणिकन्यायेन | अतिथिरूपेण |

## अभ्यासः

१. अधोलिखितप्रश्नानाम् उत्तराणि लिखत -

(क) जम्बूवृक्षः कुत्र आसीत् ?

(ख) वृक्षे कः अवसत् ?

(ग) वानरस्य नाम किमासीत् ?

(घ) मकरस्य नाम किमासीत् ?

(ङ) कयोः मध्ये मैत्री अभवत् ?

(च) मकरः भक्षितशेषाणि जम्बूफलानि गृहं गत्वा कस्यै प्रयच्छति ?

२. पूर्णवाक्येन उत्तरत -

(क) वानरः कीदृशानि फलानि अखादत् ?

(ख) समुद्रान्तरे मकरः वानरं किम् अवदत् ?

(ग) का वानरस्य हृदयं खादितुम् इच्छति ?

(घ) वानरः कस्मै जम्बूफलानि अददात् ?

(ङ) वानरस्य हृदयं कुत्र आसीत् ?

(च) प्रत्यागतः वानरः मकरं प्रति किम् अवदत् ?

३. एतेषां पदानां समानार्थकपदं लिखत -

(क) पादपः ............................ (ख) वानरः ............................

(ग) पत्नी ............................ (घ) त्वरा ............................

(ङ) सुहृद् ............................ (च) चतुरः............................

(छ) गिरिः ............................

४. सन्धिपदं विभज्य सन्धिनाम लिखत -

| | | | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|---|
| (क) | अभ्यागतः | = | ............ + ............. | .......................... |
| (ख) | पृष्ठोपरि | = | ............ + ............. | .......................... |
| (ग) | काकोलूकीयम् | = | ............ + ............. | .......................... |
| (घ) | स्वभावादयः | = | ............ + ............. | .......................... |
| (ङ) | युष्मदीयञ्च | = | ............ + ............. | .......................... |
| (च) | जलान्ते | = | ............ + ............. | .......................... |

५. निम्नलिखितशब्दान् उचितं मेलयत -

(क) मकरः वानरस्य वृक्षे एव अस्ति ।

| | |
|---|---|
| (ख) सा तानि | धिक् त्वाम्। |
| (ग) मकरः अवदत् | मित्रम् आसीत्। |
| (घ) मम हृदये तु | अभक्षयत्। |
| (ङ) त्वं मूर्खः असि | चिन्तां मा कुरु । |

६. उचितक्रियापदं योजयत -

(क) पञ्चतन्त्रनामकग्रन्थस्य रचनाम्.......................... । (अगच्छन् /अकरोत्)

(ख) मनुष्यस्य स्वभावं........................... । (वर्णयति/ पठेत्)

(ग) नीतिं ........................ । (बोधयति/लेखिष्यन्ति)

(घ) तत् ते प्रायश्चित्तमपि........................... । (नास्ति/पठेः)

(ङ) त्वं कुत्र ........................... । (गच्छति/गच्छसि)

७. अधस्तनानां समस्तपदानां विग्रहवाक्यं विलिख्य समासनाम लिखत।

| | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| (क) वानरमकरौ | ........................ | ................................। |
| (ख) सोत्कण्ठा | ........................ | ................................। |
| (ग) दुष्टपत्नी | ........................ | ................................। |
| (घ) भ्रातृजाया | ........................ | ................................। |
| (ङ) अनशनम् | ........................ | ................................। |
| (च) प्रत्युत्पन्नमतिः | ........................ | .............................। |

९. वानरस्य चातुर्यं संस्कृतभाषया, मातृभाषया, आंग्लभाषया वा लिखत ।

१०. प्रकृतिप्रत्यय-विभागं कुरुत -

| | |
|---|---|
| (क) प्रोक्तः ..................। | (ख) उक्त्वा ..................। |
| (ग) गत्वा ................... । | (घ) प्रोचुः ...................। |
| (ङ) अवलोक्य ..............। | (च) गृहीत्वा ................. । |
| (छ) गन्तुम् ..................। | (ज) चलितुम् ............... । |
| (झ) आगन्तव्यम् ............ । | |

११. अधस्तनैः क्रियापदैः वाक्यनिर्माणं कुरुत -

| |
|---|
| अकरोत्, ददौ, भविष्यति, शक्यते, गमयसि, असि, तिष्ठति, नास्ति, आह, कथयामि, वर्तते, आगमिष्यामि, भवन्ति। |

## योग्यता-विस्तारः

ब्रह्मा रुद्रः कुमारो हरिवरुणयमा वह्निरिन्द्रः कुबेर-
श्चन्द्रादित्यौ सरस्वत्युदधियुगनगा वायुरुर्वी भुजङ्गा।
सिद्धानद्योऽश्विनौ श्रीर्दितिरदितिसुता मातरश्चण्डिकाद्या,
वेदास्तीर्थानि यज्ञा गणवसुमुनयः पान्तु नित्यं ग्रहाश्च॥
मनवे वाचस्पतये शुक्राय पराशराय स सुताय।
चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः॥
सकलाऽर्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम्॥
मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च।
पञ्चतन्त्रात्तथाऽन्यस्माद्ग्रन्थादाकृष्य लिख्यते॥

प्रश्नवाचकान् शब्दान् अनिश्चयवाचकार्थं परिवर्तनाय ‘चित्’ ‘चन’ इत्यनयोः निपातयोः प्रयोगः कर्तव्यः। निपाताः यदा सर्वनामपदैः सह उपयुज्यन्ते तदा ते सर्वनामपदत्वेन व्यवह्रियन्ते, तथा अव्ययपदैः साकं यदा निपाताः प्रयुक्ता भवन्ति तदा ते अव्ययपदत्वेन व्यवह्रियन्ते। यथा -

कः = कः + चन = कश्चन, (एकवचने पुंलिङ्गे) तथैव का + चन = काचन (एकवचने स्त्रीलिङ्गे), किञ्चन (एकवचने नपुंसकलिङ्गे)।

कः = कः + चित् = कश्चित् (एकवचने पुंलिङ्गे), काचित् (एकवचने स्त्रीलिङ्गे), किञ्चित् (एकवचने नपुंसकलिङ्गे)।

के = के + चन = केचन (बहुवचने पुंलिङ्गे), काः + चन = काश्चन (बहुवचने स्त्रीलिङ्गे), कानिचन (बहुवचने नपुंसकलिङ्गे)।

के = के + चित् = केचित् (बहुवचने पुंलिङ्गे), काः + चित् = काश्चित् (स्त्रीलिङ्गे), कानिचित् (नपुंसकलिङ्गे)।

'किम्' इति शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु त्रिषु लिङ्गेषु च चित् एवं चन इत्यस्य प्रयोगो भवति। यथा -

कश्चित्, काचित्, किञ्चित्, (प्र.ए.), कश्चन, काचन, किञ्चन (प्र.ए.)

कञ्चित्, काञ्चित्, किञ्चित् (द्वि.ए), कञ्चन, काञ्चन, किञ्चन (द्वि. ए.)

एवमेव तृतीयादिविभक्तिषु चिच्चनयोः रूपाणि प्रचलन्ति।

चित् चन च यदा अव्ययपदैः युज्येते तदा तावपि अव्ययत्वं प्राप्नुतः। यथा -

क्वचित् - क्वचन

कदाचित् - कदाचन

# द्वितीयः पाठः

## रामनाममङ्गलमङ्गुलीयकम्

गद्यपद्यमयं साहित्यविभागं चम्पूकाव्यमिति अभिधीयते। विश्वनाथः सहित्यदर्पणे **"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते"** इति लक्षणम् आह। 'सुललितं चलति' इति चम्पूपदस्यार्थः। चम्पूकाव्येषु प्रसिद्धमस्ति चम्पूरामायणम्। अयं पाठ्यभागः श्रीभोजराज-विरचितचम्पूरामायणस्य सुन्दरकाण्डात् सङ्गृहीतः। रामदूतः हनूमान् समुद्रम् उल्लङ्घ्य लङ्कां गत्वा सीताम् अन्विष्य रामाङ्गुलीयकं तस्मै प्रायच्छत्। पश्चात् सीतायाः चूडामणिं स्वीकृत्य रामाय समर्पयितुं ततः प्रस्थितः। एष एव पाठस्यास्य सन्दर्भः।

१. **ततो हनूमान्दशकण्ठनीतां सीतां विचेतुं पथि चारणानाम्।**
**महेन्द्रशैलस्य खगेन्द्रवेगः प्रस्थादुदस्थात् प्रथमानवेगः॥**

**सरलार्थः -** ततः वानरनायकस्य सुग्रीवस्य आदेशानन्तरम् आञ्जनेयः द्रुतगतिः गरुडसमानवेगः रावणेनापहृतां सीताम् अन्वेष्टुं गन्धार्वादीनां मार्गे आकाशे गन्तुं महेन्द्रपर्वतस्य शिखरात् उल्लङ्घयामास।

२. **तदनु पारावारस्य पारे लम्बशिखरिणि लम्बमानः प्रतनुतरवपुः लङ्कापुरोत्तरगोपुरद्वारम् आसाद्य नितान्तचिन्तातन्तुसंतानितान्तः करणोऽभूत्।**

**सरलार्थः -** तदनन्तरं दुस्तरं समुद्रम् उल्लङ्घ्य अपरतीरे वर्तमाने लम्बपर्वते अवतीर्य सूक्ष्मशरीरः सन् मारुतिः लङ्कायाः उत्तरद्वारगोपुरे उपविश्य अनन्तचिन्तया आक्रान्तान्तरङ्गः बभूव।

३. **वानरसेना कथं** तरेदिममन्तरायं **वितन्वन्तमुदन्वन्तम्, तरतु नाम, कथमुपयातु यातुधानराजधानीमिमाम्, सर्वथा वितथमनोरथो दाशरथिः, मोघीकृतार्णवलङ्घनः केवलमहमभवम्, जीविता वा न वेति न जानामि जानकीति तत्र भगवतीं सीतामवजिगमिषुराञ्जनेयः प्रच्छन्नसञ्चार-हेतोरस्तमयं गभस्तिमालिनः केवलमभिललाष॥**

**सरलार्थः -** वानरसेना अनेकविघ्नोत्पादकं समुद्रम् इमं कथं लङ्घयेत् ? यथा कथञ्चित् सागरं तरति चेदपि इमां राक्षसराजधानीं लङ्कां कथं प्राप्नुयात् ? सर्वथा श्रीरामस्य सङ्कल्पो व्यर्थो

भविष्यति। अहमपि विफलीकृतसमुद्रलङ्घनः अभवम्। जानकी तु जीविता वा न वा इत्यपि अहं न जाने इत्येवं बहुधा विचिन्त्य पूज्यां सीताम् अन्वेष्टुं रहस्यसञ्चारनिमित्तं सूर्यास्तो भवतु इति मारुतिः अभिललाष ।

4.**ततस्तस्यां नाग-पुंनाग-ताल-हिन्ताल-तमाल-कृतमाल-सरल-बकुल-वञ्जुल-तिलक-आमलक-कूटज-लिकुच-कतक-कक्कोल-अङ्कोल-लवङ्ग-विकङ्कत-केतकी-कदम्ब-उदुम्बर-कपित्थ-अश्वत्थ-कुरवक-मरूवक-माकन्द-कुन्द-तिन्दुक-चन्दन-स्यन्दन-चम्पक-चाम्पेय-पनस-वेतस-पलाश-पाटला-रसाल-प्रियालु-प्रायैरनेकैः अशोकहनिवहैः परिवृतायां परिभ्रमन् अभ्रङ्कष-विटप-निविडित-गगनप्रपञ्चां काञ्चनकाञ्चनमयीं शिंशुपामारुरोह॥**

**सरलार्थः -** तदनन्तरम् अशोकवाटिकायां नागदन्तक-देववल्लभ-तृणराजाह्वय-श्रीताल-तापिच्छ-आरग्वध-देवदारुविशेष-केसर-अशोक-क्षुरक-तिष्यफल-भिरिमल्लिका-लकुच-जल-पङ्कशोधकबीजवृक्षविशेष-कोशफल-निकोचक-देवकुसुम-स्रुवावृक्ष-तृणद्रुमविशेष-नीपजन्तुफल-दधिफल-चलदल-रक्त-कुरण्टक-पिण्डीतक-चूतविशेष-माध्य-स्फूर्जक-मलयज-तिनिश-हेमपुष्पक-नागकेसर-कष्टकीफल-नीवार-किंशुक-फलेरुह-राजादनादि प्रदुरैः बहुभिः वृक्षवृन्दैः परिपूर्णायाम् अशोक-वाटिकायां सीतादर्शनार्थम् इतस्ततः सञ्चरन् आञ्जनेयः अत्युन्नतभीकरतरुभिः आच्छादिताकाशां काञ्चित् हिरण्मयीम् अगरुविटपीम् आरुरोह।

५. **पुनरयम् एनामालोक्यैवं चिन्तां ततान।**

**सरलार्थः -** पुनरयं हनूमान् शिंशपावृक्षस्य अधः उपविष्टाम् एतां सीताम् अवलोक्य इत्थं विचारमकरोत्।

६. **ज्योत्स्नां विनापि निवसन्निशि शीतभानुश्छायां विनापि विलसेद्दिवसेश्वरोऽपि।**
**एनां विना रघुपतिः परिगृह्य धैर्यम् सप्राण एव वसतीति विचित्रमेतत्॥**

**सरलार्थः -** चन्द्रिकां विहाय अपि रात्रौ चन्द्रः निवसेत्। सूर्यः च भार्यां छायां विना विलसेत्। एतन्न विचित्रम्। किन्तु सीतां विना श्रीरामः मनस्स्थैर्यम् अवलम्ब्य सजीवः एव वसतीति अयं विचारः आश्चर्यजनकः।

**निशाचरीस्तां निरवद्यशीलां निर्भर्त्सयन्तीर्निभृतं निवार्य।**
**अस्वप्नलोकोत्सवमात्मदृष्टं दुःस्वप्नमेकं त्रिजटा जगाद॥**

**सरलार्थः** - निर्दुष्टस्वभावा सीता पक्षपातिनी काचिद्वृद्धराक्षसी श्रीरामाभ्युदयसूचकं हर्षजनकम् आत्मानुभूतम् एकं रावणविनाशसूचकत्वाद् दुष्टं स्वप्नं सीतां उक्तवती। तथा च रामायणेऽपि लिखितम् -

**स्वप्नो ह्यद्य मया दृष्टो दारुणरोमहर्षणः।**

**राक्षसानामभावाय भर्तुरस्य जयाय च ॥**

७. **सोऽपि समवतीर्य वचनवैचित्र्यञ्जनकपुत्रीं प्रत्याययितुमाञ्जनेयः कृताञ्जलिर्व्यजिज्ञपत्।**

**सरलार्थः** - स आञ्जनेयः च वृक्षात् अवरुह्य तत्कालेऽपि चतुरवचनैः जानकीं समाश्वासयितुं नमस्कुर्वन् एवं विज्ञापनम् अकरोत्।

८. **कल्याणि ! त्वद्वियोगेन तीव्रवेगेन ताम्यतः।**

**राघवेन्द्रस्य दूतं मामन्यथा मा स्म मन्यथाः॥**

**सरलार्थः** - हे सुमङ्गले जानकि। दुर्निरोधेन त्वद्विरहेण तप्यतः श्रीरामस्य दूतं माम् आञ्जनेयम् अन्यथा अन्यः इति मा चिन्तय।

९. **एवमभिहितया तया संभूतविस्रम्भतया भयादपेतया तावदनुयुक्तः पवनतनयो बालिमरणकारणं सुग्रीवस्य सख्यमाख्याय प्राचेतसचेत इव सन्ततसंनिहित-रामनाममङ्गलम् अङ्गुलीयकमस्यै प्रायच्छत्।**

**सरलार्थः** - एवं हनूमद्वचनात् संजातविश्वासेन भयमुक्ता सीता 'कथं भवान् श्रीरामस्य दूतः संजातः' इत्यादिकं प्रश्नं हनूमन्तम् अपृच्छत्। तदा पवनतनयः बालिमरणकारणम्, रामसुग्रीवयोः मैत्रीं च कथयित्वा वाल्मीकिमनः इव निरन्तरसन्निकृष्टेन रामनाम्ना मुद्रितं श्रीरामप्रेषितं मङ्गलं रामाङ्गुलीयकं सीतायै प्रददौ।

**सौख्यावहस्य पवनात्मजनीयमान-रामाङ्गुलीयकविलोकनवासरस्य।**

**सत्यं कलां शततमीं भुवि नैव भेजे, पाणिग्रहोत्सवदिनं जनकात्मजायाः॥**

**सरलार्थः** - जनकात्मजायाः सीतायाः पाणिग्रहोत्सवदिनं परमानन्दकरस्य हनूमता नीयमानमानीतं यद् रामाङ्गुलीयकं (श्रीरामाभिज्ञानाङ्गुलिमुद्रिका) तत्सन्दर्शनदिनस्य शततमीं कलामंशम्। भुवि सत्यं यथार्थं नैव भेजे न प्रापैव। ततोऽपि सहस्रगुणाधिकानन्दजनकत्वादस्येति भावः। अत्र कलाभजनसम्बन्धेऽपि असम्बन्धोक्तेः अतिशयोक्तिः।

१०. **सैषा परिचितकथास्मरणात् द्विगुणितदुर्दशा केशपिनद्धमपरमिदम् अभिज्ञानमुन्मुमोच।**

**सरलार्थः -** सा अपूर्वानुभूतवृत्तान्तस्मृत्या द्विगुणितदुःखस्था सीता अभिज्ञानं दातुं केशपाशावृतं चूडामणिम् उन्मुमोच।

११. **चूडामणिं कपिवरस्य ददौ दशास्य सन्त्रासपुञ्जितरुषाग्निदशं कृशाङ्गी।**
**आदाय तत्प्रणतिपूर्वमसौ प्रतस्थे माणिक्यगर्भवदनोरगतुल्यबाहुः॥**

**सरलार्थः -** रावणस्य हिंसापीऽनादिभिः पिण्डीभूतं सीता क्रोधाग्निं शिरोरत्नं चूडामणिं रामाय दातुं कृशाङ्गी सीता आञ्जनेयाय प्रददौ। तं नमस्कारपूर्वकं चूडामणिं स्वीकृतसर्पसदृशदीर्घबाहुः मारुतिः अशोकवनात् प्रतस्थे ।

## शब्दार्थाः

| | |
|---|---|
| दशकण्ठनीताम् | रावणेन अपहृताम् |
| विचेतुम् | अन्वेष्टुम् |
| चारणानाम् | गन्धर्वादीनाम् |
| खगेन्द्रवेगः | गरुडस्य इव वेगो यस्य |
| उल्लङ्घयामास | कूर्दितवान् |
| विफलीकृतसमुद्रलङ्घनः | समुद्रलङ्घनं विफलं जातं यस्य |
| अभिललाष | कामनां कृतवान् |
| आच्छादिताकाशम् | आच्छादितः आकाशः यया, ताम् |
| आरुरोह | आरूढवान् |
| प्रददौ | प्रदत्तवान् |
| उन्मुमोच | उन्मुक्तवती |
| प्रतस्थे | प्रस्थानं कृतवान् |

## अभ्यासः

## १. उच्चारणं कुरुत -

प्रस्थादुदस्थात्, लम्बशिखरिणी, प्रच्छन्नसञ्चारहेतोरस्तमयम्, शिंशपामारुरोह, एनामालोक्यैवम्, कृताञ्जलिर्व्यजिज्ञपत्, माणिक्यगर्भवदनोरगतुल्यबाहुः, सम्भूतविस्रम्भतया, रामनाममङ्गलम्।

## २. संस्कृतभाषया उत्तरत -

(क) गद्यपद्यमयं काव्यं किम् ?

(ख) चम्पूरामायणस्य कर्ता कः ?

(ग) सीतां कः अपहृतवान् ?

(घ) लङ्कानगरं केषां राजाधानी ?

(ङ) हनूमान् सीतायै किं प्रायच्छत् ?

(च) कम् आदाय हनूमान् लङ्कातः प्रतस्थे ?

(छ) कस्य नाम "दशास्यः" इति ?

(ज) त्रिजटा का अस्ति ?

## ३. यथोचितं संयोजयत -

| | अ | आ |
|---|---|---|
| (क) | जानकी | आञ्जनेयः |
| (ख) | दाशरथिः | सूर्यः |
| (ग) | दशकण्ठः | सीता |
| (घ) | हनूमान् | रावणः |
| (ङ) | दिवसेश्वरः | श्रीरामः |
| (च) | खगेन्द्रः | चन्द्रमा |
| (छ) | शीतभानुः | गरुडः |

## ४. रिक्तस्थानं पूरयत -

(क) सीतां विचेतुं पथि ____________प्रस्थादुदस्थात् प्रथमानवेगः॥

(ख) ज्योत्स्नां ___________________ शीतभानुः ।

(ग) राघवेन्द्रस्य ____________ मा स्म मन्यथाः ।

(घ) प्राचेतसचेत इव ___________________अङ्गुलीयकमस्यै प्रायच्छत्।

(ङ) चूडामणिं ______________ कृशाङ्गी ।

## ५. सन्धिं विभज्य नाम लिखत -

| | | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | सोऽपि | ........... + .......... | ..................। |
| (ख) | महेन्द्रः | ........... + .......... | ..................। |
| (ग) | सैषा | ........... + .......... | ..................। |
| (घ) | वसतीति | ........... + .......... | ..................। |
| (ङ) | दिवसेश्वरः | ........... + .......... | ..................। |

## ६. विग्रहवाक्यं विलिख्य समासनाम लिखत -

| | | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| (क) | खगेन्द्रवेगः | ......................... | .........................। |
| (ख) | राघवेन्द्रः | ......................... | .........................। |
| (ग) | शीतभानुः | ......................... | .........................। |
| (घ) | दशास्यः | ......................... | .........................। |
| (ङ) | दिवसेश्वरः | ......................... | .........................। |
| (च) | विफलीकृतसमुद्रलङ्घनः | ......................... | .........................। |

## ७. अधोलिखितान् श्लोकान् पूरयित्वा संस्कृतभाषया अर्थं लिखत -

(क) ततो हनूमान्दशकण्ठनीतां, __________।

(ख) __________ प्रथमानवेगः ।

(ग) चूडामणिं ____________ बाहुः।

## ८. प्रयोगपरिवर्तनं कुरुत -

(क) आञ्जनेयः रामनाम्ना मुद्रितं श्रीरामप्रेषितं मङ्गलं रामाङ्गुलीयकं सीतायै प्रददौ।

(ख) श्रीरामस्य दूतं माम् आञ्जनेयम् अन्यथा मा चिन्तय।

(ग) चूडामणिं रामाय दातुं कृशाङ्गी सीता आञ्जनेयाय प्राददात्।

(घ) हनूमान् शिंशपावृक्षस्य अधः उपविष्टाम् एतां सीताम् अवलोकितवान्।

(ङ) चन्द्रिकां विहाय अपररात्रौ चन्द्रः निवसेत्।

### ९. पाठस्याधारेण एतान् प्रश्नान् समाधत्त -

(क) विश्वनाथः साहित्यदर्पणे चम्पूकाव्यस्य किं लक्षणम् आह ?

(ख) अयं पाठ्यभागः कुतः सङ्गृहीतः ?

(ग) हनूमान् महेन्द्रशैलात् कथम् उदस्थात् ?

(घ) हनूमान् कथं सीतां स्वपरिचयम् उक्तवान् ?

(ङ) हनूमान् किम् इति चिन्तां ततान ?

(च) रामः सीतां विना कथं निवसति ?

(छ) अशोकवनात् कः प्रतस्थे ?

## योग्यता-विस्तारः

### विशेष्यविशेषणभावः

**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।**
**तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्य॥**

| यथा - | विशेषणम् | विशेष्यम् | विशेषणम् | विशेष्यम् |
|---|---|---|---|---|
| १. | सुन्दरः | बालकः | सुन्दराः | बालकाः |
| | सुन्दरी | बालिका | सुन्दर्यः | बालिकाः |
| २. | सुन्दरम् | नगरम् | सुन्दराणि | नगराणि |
| ३. | उत्तमेन | छात्रेण | उत्तमाभिः | छात्राभिः |
| ४. | उत्तमाय | छात्राय | उत्तमायै | छात्रायै |
| ५. | उत्तमात् | छात्रात् | उत्तमेभ्यः | छात्रेभ्यः |
| ६. | उत्तमस्य | छात्रस्य | उत्तमानां | छात्राणाम् |
| ७. | उत्तमे | छात्रे | उत्तमेषु | छात्रेषु |

# तृतीयः पाठः

## प्रयोगाः

## (कर्तरि, कर्मणि, भावे, कृदन्तप्रयोगाश्च)

### प्रयोगाः त्रिविधाः -

(१) कर्तरि, (२) कर्मणि, (३) भावे इति। धातुः द्विविधः - सकर्म्मकः अकर्म्मकश्च इति। कर्म विद्यते यस्मिन् सः सकर्मकः, कर्म न विद्यते यस्मिन् सः अकर्मकः। सकर्मकधातुभ्यः कर्तरि कर्मणि च इति द्वौ प्रयोगौ भवतः। अकर्मकधातुभ्यः कर्तरि भावे च प्रयोगो भवति।

### कर्तरि प्रयोगः -

**नियमाः -**

१. कर्तरिप्रयोगे कर्तृपदस्य प्राधान्यं भवति।

२. अस्मिन् प्रयोगे कर्ता सर्वदा प्रथमाविभक्तौ भवति।

३. कर्मपदं द्वितीयाविभक्त्यन्तं भवति।

४. क्रियापदं कर्तृपदानुसारं भवति।

**यथा** - छात्रः वेदं पठति। अत्र 'छात्रः' इति पदं कर्तृपदं (प्रथमा), 'वेदम्' इति कर्मपदम् (द्वितीया), 'पठति' इति क्रियापदम्। अत्र कर्तृपदानुसारं क्रियापदम् अभवत्।

**उदाहरणानि -**

१. शिष्यः ऋग्वेदं पठति।

२. गुरुः उपवासं करोति।

३. विद्वान् ग्रन्थान् लिखति।

४. कपयः फलं खादन्ति।

५. बालिके विद्यालयं गच्छतः।

६. माता वस्त्राणि प्राक्षालयति।

७. त्वं लेखनीम् आनय।

८. नरेशः नववादने पाठशालां गमिष्यति।

९. अर्जुनः कन्दुकक्रीडाम् अपश्यत्।

१०. भवान् कथां श्रावयतु।

**कर्मणिप्रयोगः -**

अयं प्रयोगः सकर्मकधातुभ्यः एव सम्भवति। अस्मिन् प्रयोगे कर्मपदं प्रधानं भवति।

**नियमाः -**

१. कर्मपदं सर्वदा प्रथमाविभक्तौ भवति।

२. कर्तृपदं सर्वदा तृतीयाविभक्तौ भवति।

३. कर्मपदानुसारं क्रियापदं भवति।

४. क्रियापदम् आत्मनेपदे भवति। मूलधातुना सह 'य' इति योज्यते। (पठ्+य+ ते) यथा - छात्रेण वेदः पठ्यते।

**उदाहरणानि -**

१. शिक्षकेण पाठ्यक्रमः लिख्यते।

२. बालकेन चन्द्रः अदृश्यत।

३. कपिना फलानि खाद्यन्ते।

४. शिक्षकेण त्वं पृच्छ्यस्व।

५. मात्रा अहम् आहूये।

६. तैः दशवादने वेदपाठशाला गंस्यते।

७. युष्माभिः वयम् असूच्यामहि।

८. आरक्षकाभ्यां चोरौ गृह्येते।

९. भवद्भिः गृहकार्यं क्रियताम्।

१०. बालिकाभिः जलकुप्यः आनेष्यन्ते।

## भावेप्रयोगः -

**नियमाः -**

भावेप्रयोगः अकर्मकधातुभ्यः भवति। भावे प्रयोगे क्रियायाः भावः बोध्यते। अस्मिन् प्रयोगे कर्तृपदं तृतीयाविभक्तौ भवति। प्रयोगेऽस्मिन् कर्मपदं न भवति। क्रियापदम् आत्मनेपदान्तं तथा प्रथमपुरुषैकवचनान्तं भवति। यथा - आचार्येण भूयते।

त्रिविधप्रयोगेषु कः भेदः इति कोष्ठके पश्यामः -

| प्रयोगः | कर्तृपदम् | कर्मपदम् | क्रियापदम् | प्रधानम् |
|---|---|---|---|---|
| कर्तरि | प्रथमाविभक्त्यन्तम् | द्वितीयाविभक्त्यन्तम् | कर्तृपदानुसारम् | कर्तृपदम् |
| कर्मणि | तृतीयाविभक्त्यन्तम् | प्रथमाविभक्त्यन्तम् | कर्मपदमनुसरति, धातुना सह 'य' योज्यते | कर्मपदम् |
| भावे | तृतियाविभक्त्यन्तम् | न भवति | आत्मनेपदप्रथम-पुरुषैकवचनम् | क्रियापदम् |

## उदाहरणानि

| कर्तरि प्रयोगः | | | कर्मणि प्रयोगः | | |
|---|---|---|---|---|---|
| **श्वेतकेतुः** | ऋग्वेदं | पठति। | श्वेतकेतुना | ऋग्वेदः | पठ्यते। |
| **शिष्यः** | गुरुम् | अनमत्। | शिष्येण | गुरुः | अनम्यत। |
| **बालकौ** | पाठशालां | गमिष्यतः। | बालकाभ्यां | पाठशाला | गम्स्यते। |
| **शिक्षकः** | त्वां | पृच्छतु। | शिक्षकेण | त्वं | पृच्छ्यस्व। |
| **शिशवः** | अश्वशकटम् | आरोहन्। | शिशुभिः | अश्वशकटः | आरुह्यत। |
| **माता** | माम् | आह्वयत्। | मात्रा | अहम् | आहूये। |
| **विद्वान्** | ग्रन्थान् | लिखति। | विदुषा | ग्रन्थाः | लिख्यन्ते। |
| **सा** | युष्मान् | पृच्छति। | तया | यूयं | पृच्छ्यध्वे। |
| **आचार्यः** | आवां | वदिष्यति। | आचार्येण | आवां | वदिष्यावहे। |
| **माता** | वस्त्राणि | प्राक्षालयत्। | मात्रा | वस्त्राणि | प्राक्षाल्यन्त। |
| **त्वं** | लेखनीम् | आनयतु | त्वया | लेखनी | आनीयताम्। |
| **ते** | अस्मान् | जानन्ति। | तैः | वयं | ज्ञायामहे। |
| **भक्तः** | देवं | पश्यति। | भक्तेन | देवः | दृश्यते। |
| **बालिकाः** | गीतं | श्रृण्वन्ति। | बालिकाभिः | गीतं | श्रूयते। |
| **भवन्तः** | गृहकार्यं | कुर्वन्तु। | भवद्भिः | गृहकार्यं | क्रियाताम्। |

| | | | | | |
|---|---|---|---|---|---|
| **राजा** | गां | ददाति। | राज्ञा | गौः | दीयते। |
| **राकेशः** | फलरसं | पिबति। | राकेशेन | फलरसः | पीयते। |

| कर्तरि प्रयोगः | भावे प्रयोगः |
|---|---|
| १. शिशुः स्वपिति। | शिशुना सुप्यते। |
| २. पुष्पाणि विकसन्ति। | पुष्पैः विकस्यते। |
| ३. बालिकाः अहसन्। | बालिकाभिः अहस्यत। |
| ४. त्वं नृत्य। | त्वया नृत्यताम्। |
| ५. सः तिष्ठति। | तेन स्थीयते। |
| ६. भवान् क्रीडेत्। | भवता क्रीड्येत। |
| ७. त्वं मिलेः। | त्वया मिल्येत। |

## कृदन्ताः

कृत् अन्ते यस्य सः कृदन्तः। तिङ्भिन्नः प्रत्ययः 'कृत्' इति कथ्यते। अयमपि तिङ्प्रत्यय इव धातोः विधीयते। धातोः तिङ्-प्रत्ययेन निष्पन्नं पदं तिङन्तं भवति, धातोः कृत्-प्रत्ययेन तु निष्पन्नं पदं सुबन्तम् इति कथ्यते। "कृत्तद्धितसमासाश्च" इति सूत्रेण अस्य प्रातिपदिकसंज्ञा भवति।

कृत्त्-प्रत्ययाः विविधाः भवन्ति, यथा - (१) वर्तमानकृदन्तः (२) भूतकृदन्तः (३) विध्यर्थकृदन्तः (४) कृदन्त-अव्ययानि।

### वर्त्तमानकृदन्तः -

**शतृ-प्रत्ययः**

धातुः परस्मैपदी, आत्मनेपदी, उभयपदी इति त्रिविधो भवति। तत्र परस्मैपदिधातुभ्यः कर्त्रर्थे शतृ-प्रत्ययः विधीयते। शत्रन्तं पदं पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-भेदात् विविधं रूपं प्राप्नोति। यथा -

| | | |
|---|---|---|
| पठन् | - | पुंलिङ्गे |
| पठन्ती | - | स्त्रीलिङ्गे |

पठत् - नपुंसकलिङ्गे

**पुँल्लिङ्गम्**

पठ् धातोः पुँल्लिङ्गे शत्रन्तं रूपं 'पठन्' इति। 'पठत्' इति प्रातिपदिकम्। प्रथमाविभक्तौ एकवचने रूपं भवति 'पठन्' इति। जुहोत्यादिगणीयान् धातुन् अतिरिच्य अन्येषां सर्वेषां रूपाणि समानानि भवन्ति। लट्-लकारस्य प्रथमपुरुषस्य बहुवचनरूपात् 'ति' इति भागः अपसार्यते चेत् अवशिष्ट भागः शत्रन्तभागः भवति।

**उदाहरणानि -**

१. बालकः वेदं पठन् अस्ति।
२. नर्तको नृत्यन् हसति।
३. नचिकेताः यानं पश्यन् वेदपाठशालां गच्छति।
४. गच्छन्तं बालकं माता पश्यति।
५. वेदं पठन्तं शिष्यं गुरुः आहूतवान्।
६. पठद्भिः छात्रैः आचार्यः नमस्कृतः।
७. वाक्यं लिखता तेन दोषः आचरितः।
८. वेदपाठशालां गच्छते बालकाय माता पुस्तकम् अददात्।
९. नमस्कुर्वते शिष्याय गुरुः आशिषम् अददात्।
१०. चलतः शकटात् शिशुः अपतत्।
११. गर्जतः सिंहात् जनाः बिभ्यति।
१२. पठतः अर्काञ्जनस्य माता एषा।
१३. ददतः राज्ञः औदार्यं पश्यन्तु।
१४. नद्यां संचरत्सु विहगेषु हंसः सुन्दरः।
१५. पठत्सु शिष्येषु सुरेशः बुद्धिमान्।

**सप्तसु विभक्तिषु शतृप्रत्यये रूपाणि -**

| विभक्तिः | एक वचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | पठन् | पठन्तौ | पठन्तः |
| **द्वितीया** | पठन्तं | पठन्तौ | पठतः |

| | | | |
|---|---|---|---|
| **तृतीया** | पठता | पठद्भ्याम् | पठद्भिः |
| **चतुर्थी** | पठते | पठद्भ्याम् | पठद्भ्यः |
| **पञ्चमी** | पठतः | पठद्भ्याम् | पठद्भ्यः |
| **षष्ठी** | पठतः | पठतोः | पठताम् |
| **सप्तमी** | पठति | पठतोः | पठत्सु |
| **सम्बोधनम्** | हे पठन्! | हे पठन्तौ! | हे पठन्तः! |

**जुहोत्यदिगणीयस्य दा-धातोः सप्तसु विभक्तिषु शतृप्रत्यये रूपाणि -**

| विभक्तिः | एक वचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ददत् | ददतौ | ददतः |
| द्वितीया | ददतम् | ददतौ | ददतः |
| तृतीया | ददता | ददद्भ्याम् | ददद्भिः |
| चतुर्थी | ददते | ददद्भ्याम् | ददद्भ्यः |
| पञ्चमी | ददतः | ददद्भ्याम् | ददद्भ्यः |
| षष्ठी | ददतः | ददतोः | ददताम् |
| सप्तमी | ददति | ददतोः | ददत्सु |
| सम्बोधनम् | हे ददत्! | हे ददतौ! | हे ददतः! |

## स्त्रीलिङ्गम् -

शत्रान्तानि पदानि स्त्रीलिङ्गे द्विविधं रूपं भजन्ते। न विद्यते रूपेषु काऽपि साम्यता। अधस्तनम् उदाहरणद्वयं पश्यत -

शिष्या पठन्ती अस्ति।

बालिका गीतं श्रृण्वती अस्ति।

उपरि प्रदत्ते उदारणद्वये प्रथमोदाहरणे 'पठन्ती' इत्यत्र 'नुम्' (नकारः) श्रूयते, किन्तु द्वितीये उदाहरणे 'नुम्' (नकारः) न श्रूयते। एवं तर्हि कुत्र नकारः भवेत्, कुत्र नकारः न भवेत् इति

कथं जानीयाम? अस्याम् अवस्थायां कश्चन सरलोपायः अवलम्बनीयः, सोपानक्रमेण तमुपायं जानीयाम।

गच्छति, पिबति, करोति इत्यादीनि वर्तमानकालरूपाणि। एतेषामन्ते 'ति' इति श्रूयते। एतस्मात् 'ति' भागात् पूर्वं यदि ह्रस्व-अकारः श्रुयते तर्हि तत्र तिभागात् पूर्वं नकारः (नुम्) आगच्छति। 'ति' भागात् पूर्वं ह्रस्व-अकारः न श्रूयते चेत् तत्र नकारः (तुम्) न भवति। पुनः यदि तिभागात् पूर्वम् आकारः श्रूयते तर्हि तत्र विकल्पेन नकारः (नुम्) भवति।

**अत्र ध्यातव्यम्** - अवर्णान्तात् शतृ-प्रत्यये परे विकल्पेन नुम् भवति। भ्वादिगणीयेभ्यो दिवादिगणीयेभ्यश्च परे तु नित्यं नुमागमः। जुहोत्यादिगणीयेभ्यो धातुभ्यो नुम् न भवति। यथा -

| | | |
|---|---|---|
| गच्छति | - | गच्छन्ती |
| जानाति | - | जानती/जानन्ती |
| चिनोति | - | चिन्वती |
| करोति | - | कुर्वती |
| स्नाति | - | स्नाती / स्नान्ती |
| रचयति | - | रचयन्ती |
| लिखति | - | लिखती/लिखन्ती |
| ददाति | - | ददती |
| रोदिति | - | रुदती |
| नृत्यति | - | नृत्यन्ती |
| उपदिशति | - | उपदिशती/उपदिशन्ती |
| उपविशति | - | उपविशती/उपविशन्ती |

**उदाहरणानि -**

१. नर्तकी नृत्यन्ती अस्ति ।

२. उपदिशतीं/उपदिशन्तीं मातरं पुत्रः अनुसरति।

३. भोजनं कुर्वत्या बालिकया सह रामः सम्भाषणं करोति।

४. पुष्पं चिन्वत्यै पुत्र्यै माता पुष्पाधानम् अददात्।

५. पाठशालां गच्छन्त्याः बालिकायाः पथिकः पन्थानं पृष्टवान्।

६.	गीतं शृण्वत्याः वागाम्भृण्याः लेखनी एषा।

७.	निर्धनाय धनं ददत्यां पुत्र्यां माता स्निह्यति।

८.	पतन्त्यां दूरवाण्यां भावचित्राणि सन्ति।

## नपुंसकलिङ्गम् -

नपुंसकलिङ्गे शत्रन्तानां रूपाणि पचत्-शब्दस्य रूपाणि इव भवन्ति। प्रथमाद्वितीये इति विभक्तिद्वयं विहाय अन्यासु विभक्तिसु शत्रान्तानां रूपाणि पुँल्लिङ्गरूपवद् भवन्ति।

**उदाहरणानि -**

१.	वृक्षात् पर्णं पतत् अस्ति।

२.	पुस्तकं नश्यत् खेदं जनयति।

३.	प्रवहत् जलं शिशुः पश्यति।

४.	विकसितेन पुष्पेण माता देवं पूजयति।

५.	गच्छते मित्राय लेखनीं ददातु।

६.	पततः फलात् बीजं स्वीकरोतु।

७.	गच्छतः यानस्य नाम किम् ?

८.	अवतरति विमाने मम पिता अस्ति।

## शानच्-प्रत्ययः -

शानच्-प्रत्ययः आत्मनेपदिभ्यो धातुभ्यो भवति। शानच्-प्रत्यये 'आन' इत्यंशः अवशिष्यते। शानच्-प्रत्ययान्त-शब्दस्य द्विविधं रूपं भवति। एकत्र मकारः (मुक्) श्रूयते, अपरत्र मकारः (मुक्) न श्रूयते। कुत्र मकारः श्रूयते, कुत्र मकारः न श्रूयते इति पश्यामः।

वर्धते, वर्तते, शेते, भुङ्क्ते इत्यादीनि लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपाणि। यत्र 'ते' इत्यस्मात् परम् अकारः श्रूयते तत्र 'ते' इत्यस्मात् पूर्वं मकाराः (मुक्) भवति।

यथा - वर्धते = वर्ध + ते + आन = वर्ध + म् + आन = वर्धमान

यत्र 'ते' इत्यस्मात् पूर्वम् अकारभिन्नः वर्णः श्रूयते तत्र मकारः (मुक्) न भवति। तत्र लट्-लकार-प्रथमपुरुषद्विवचने यत् रूपं तत्र 'ते' इत्यस्य स्थाने नकारो योजनीयः।

यथा - शयाते = शया + ते = शयान

शानच्-प्रत्ययान्तस्य पुँल्लिङ्गे रामशब्दरूपवत्, स्त्रीलिङ्गे लताशब्दरूपवत्, नपुंसि च फलशब्दरूपवत् रूपं चलति।

**उदाहरणानि -**

१. वेदं पठतः छात्रस्य बुद्धिः वर्धमाना अस्ति।

२. शयानं शिशुं माता उत्थापयति।

३. उड्डीयमानेन विमानेन पिता देहलीं गच्छति।

४. बालकः ओदनं भुञ्जानः वार्तालापं करोति।

५. सम्भाषमाणान् शिष्यान् आह्वय।

६. भिक्षां याचमानाय ब्राह्मणाय राजा गां ददौ।

७. शिशुः डयमानानि विमानानि पश्यति।

८. अधीयानात् व्रजेशात् लेखनीं स्वीकुरु।

९. कार्यक्रमे उपतिष्ठमानानाम् अतिथीनां स्वागतं कुर्वन्तु।

१०. विद्यमानेषु छात्रेषु रामः उत्तमः।

## भूतकृदन्तः

### क्त प्रत्ययः -

**निष्ठा** *(पा.सू. ३.२.१०२)*

अतीतकालार्थे धातोः क्त-प्रत्ययः भवति। अयं प्रत्ययः कर्मणि भावे च भवति। **यथा -**
**कर्मणि** - सः मोदकम् अखादत् = तेन मोदकम् खादितम्। अत्र सः इति कर्ता तृतीयाविभक्तौ अभवत्। मोदकम् इति कर्मानुसारं खादितम् इति क्रियापदम् अभवत्। मोदकम् इति नपुंसकलिङ्गे प्रथमाविभक्तौ एकवचने अस्ति, अतः खादितम् इत्यपि नपुंसकलिङ्गे प्रथमाविभक्तौ एकवचने अभवत्।

**भावे** - देवदत्तः अशेत = देवदत्तेन शयितम्। भावे तु क्त-प्रत्ययान्तं पदं नित्यनपुंसके एकवचने भवति।

### कर्मणि -

१. सः व्याघ्रम् अपश्यत् = तेन व्याघ्रः दृष्टः। तेन व्याघ्रौ दृष्टौ। तेन व्याघ्राः दृष्टाः।

२. यूयं पुस्तकम् अपठत = युष्माभिः पुस्तकं पठितम् । युष्माभिः पुस्तके पठिते। युष्माभिः पुस्तकानि पठितानि।

३. रामलक्ष्मणौ मातरम् अस्मरताम् = रामलक्ष्मणाभ्यां माता स्मृता। रामलक्ष्मणाभ्यां मातरौ स्मृते। रामलक्ष्मणाभ्यां मातरः स्मृताः।

४. विद्वान् ग्रन्थान् अलिखत् = विदुषा ग्रन्थाः लिखिताः।

५. पाण्डवाः कौरवान् अजयन् = पाण्डवैः कौरवाः जिताः।

६. अहम् एकां लेखनीम् अक्रीणाम् = मया एका लेखनी क्रीता।

**गत्यर्थ-अकर्मक-श्लिष-शीङ्-स्था-आस-वस-जन-रुह-जीर्यतिभ्यश्च** *(पा.सू. ३.४.७१)*

गमनार्थकानां धातूनां 'क्त' प्रत्यये कर्तरि कर्मणि च प्रयोगः भवति। यदा कर्तरि प्रयोगः भवति तदा कर्ता प्रथमाविभक्तौ कर्म च द्वितीयाविभक्तौ भवति। एवञ्च कर्तुः अनुसारं क्रियापदं भवति। यदा कर्मणि प्रयोगः तदा तु कर्ता तृतियाविभक्तौ कर्म च प्रथमाविभक्तौ भवति। एवञ्च कर्मणः अनुसारं क्रियापदं भवति।

**यथा - कर्तरि** - सः ग्रामम् अगच्छत् = सः ग्रामं गतः। तौ ग्रामम् अगच्छताम् = तौ ग्रामं गतौ। ते ग्रामम् अगच्छन् = ते ग्रामं गताः।

**कर्मणि** - सः ग्रामम् अगच्छत् = तेन ग्रामः गतः। सः ग्रामौ अगच्छत् = तेन ग्रामौ गतौ। सः ग्रामान् अगच्छत् = तेन ग्रामाः गताः।

**उदाहरणानि -**

१. मनोरमा लेखनीं प्राप्नोत् = मनोरमया लेखनी प्राप्ता, मनोरमया लेखन्यौ प्राप्ते, मनोरमया लेखन्यः प्राप्ताः (कर्मणि) । बालिका लेखनीं प्राप्नोत्, बालिका लेखनीं प्राप्ता, बालिके लेखनीं प्राप्ते, बालिकाः लेखनीं प्राप्ताः (कर्तरि)।

२. अर्चकः उद्यानात् पुष्पम् आनयत्, अर्चकेन उद्यानात् पुष्पम् आनीतम्, अर्चकेन उद्यानात् पुष्पे आनीते, अर्चकेन उद्यानात् पुष्पाणि आनीतानि (कर्मणि)। अर्चकः उद्यानात् पुष्पम् आनीतः, अर्चकौ उद्यानात् पुष्पम् आनीतौ, अर्चकाः उद्यानात् पुष्पम् आनीताः (कर्तरि)

अकर्मक-धातूनां 'क्त' प्रत्यये कर्तरि भावे च प्रयोगो भवति। भावे प्रयोगे क्रियापदं सर्वदा नपुंसकलिङ्गे एकवचने च भवति। **यथा** - कर्तरि - देवदत्तः अहसत्, देवदत्तः हसितः, देवदत्तौ हसितौ, देवदत्ताः हसिताः।

**भावे** - देवदत्तः अहसत् ,देवदत्तेन हसितम्, देवदत्ताभ्याम् हसितम्, देवदत्तैः हसितम्।

**उदाहरणानि -**

१. मञ्जूषा अहसत्। मञ्जूषया हसितम्, मञ्जूषाभ्यां हसितम्, मञ्जूषाभिः हसितम् (भावे)। मञ्जूषा हसिता, मञ्जूषे हसिते, मञ्जूषाः हसिताः (कर्तरि)।

२. अहं ह्यः प्रातः षड्-वादने उदतिष्ठम्। मया ह्यः प्रातः षड्वादने उत्थितम्, आवाभ्यां ह्यः प्रातः षड्-वादने उत्थितम्, अस्माभिः ह्यः प्रातः षड्-वादने उत्थितम् (भावे)। अहं ह्यः प्रातः षड्-वादने उत्थितः, आवां ह्यः प्रातः षड्-वादने उत्थितौ, वयं ह्यः प्रातः षड्-वादने उत्थिताः (कर्तरि)।

३. कोरोना-विषाणु-कारणात् विश्वे बहवः जनाः अम्रियन्त। कोरोना-विषाणु-कारणात् विश्वे बहुभिः जनैः मृतम् (भावे)। कोरोना-विषाणु-कारणात् विश्वे बहवः जनाः मृताः (कर्तरि)।

## क्तवतु-प्रत्ययः

**निष्ठा** *(पा.सू. ३.२.१०२)*

अतीतकालार्थे धातोः क्तवतु प्रत्ययो भवति। अस्य प्रत्ययस्य केवलं कर्तरि प्रयोगो भवति। यथा - शिशुः मोदकम् अखादत्। शिशुः मोदकं खादितवान्। अत्र अखादत् इति अतीतकालबोधकलङ्लकारस्य प्रयोगः। अत्र 'खादृँ भक्षणे' इति धातुरस्ति। एतस्मात् धातोः अतीतकालबोधकः क्तवतु प्रत्ययः अभवत्। पुंलिङ्गे - तवान्, स्त्रीलिङ्गे - तवती, नपुंसकलिङ्गे - तवत् इति शेषः तिष्ठति। यथा - पुंलिङ्गे - खादितवान्, स्त्रीलिङ्गे - खादितवती, नपुंसकलिङ्गे - खादितवत्। क्तवतुप्रत्ययान्तस्य पुंलिङ्गे भवत् - शब्दवत् स्त्रीलिङ्गे नदीशब्दवत् नपुंसकलिङ्गे जगत् - शब्दवच्च रूपं भवति। अयं प्रत्ययः कर्तुः विशेषणं भवति।

**उदाहरणानि -**

### पुंलिङ्गे

१. अहं भवतां लेखं दृष्टवान्।

२. बालकौ गीतवन्तौ।

३. ते गृहकार्यं कृतवन्तः।

४. रामः रावणं पराजितवान्।

५. युवाम् अभुक्तेभ्यः भोजनं दत्तवन्तौ।

६.	धनं चोरितवन्तं चोरम् आरक्षकाः गृहीतवन्तः।

७.	पुस्तकं स्वीकृतवता बालकेन सह देवदत्तः विद्यालयं गच्छति।

८.	प्रथमस्थानं प्राप्तवते बालकाय विद्यालयपक्षतः पुरस्कारं ददाति।

९.	कथां श्रुतवतः बालकात् शृणोतु।

१०.	जलम् आनीतवतः बालकस्य पुस्तकम् इदम्।

११.	संस्कृतभाषायाः अवमाननां कृतवति जने संस्कारः नास्ति।

**स्त्रीलिङ्गे**

१.	बालिका गीतवती।

२.	ते मातरं स्मृतवत्यौ।

३.	बालिकाः गृहकार्यं कृतवत्यः।

४.	अलङ्कारं चोरितवतीं चोराम् आरक्षिकाः गृहीतवत्यः।

५.	पठितवत्या बालिकया वाक्यं लिखितम्।

६.	प्रथमस्थानं प्राप्तवत्यै बालिकायै विद्यालयपक्षतः पुरस्कारं ददाति।

७.	श्रुतवत्याः बालिकायाः कथां शृणोतु।

८.	ब्रह्म ज्ञातवत्याः वागाम्भृण्याः अज्ञातं किमपि नास्ति।

९.	जन्म दत्तवत्यां मातरि स्निह्यतु।

**नपुंसकलिङ्गे**

१.	लोकयानं गतवत्।

२.	पुष्पे विकसितवती।

३.	विमानानि उड्डयितवन्ति।

४.	वृक्षात् पर्णं पतितवत्।

५.	गतवत् लोकयानम् अहं दृष्टवान्।

६.	गतवता लोकयानेन कृष्णः मातुलालयं गच्छति।

७.	आगतवते मित्राय पुस्तकं ददातु।

८.	गतवतः यानात् सः पतति।

९.	उत्पीठिकायाः पतितवतः पुस्तकस्य पत्रम् इदम्।

१०. वञ्चनां कृतवति मित्रे मा विश्वसितु।

# विध्यर्थकृदन्तः

## 'तव्यत्/अनीयर्' प्रत्ययौ

**तव्यत्तव्यानीयरः** *(पा.सू.३.१.९६)*

उचितार्थे गम्यमाने धातोः तव्यत्/तव्य/अनीयर् प्रत्यया भवन्ति। एते प्रत्ययाः कर्मार्थे भावार्थे विधीयन्ते। तव्यत्तव्यप्रत्ययान्तौ शब्दौ समानं रूपं भजेते। **कर्मार्थे यथा** - भवान् विद्यालयं गच्छेत्। भवता विद्यालयः गन्तव्यः/गमनीयः। **भावार्थे यथा** - सः भवेत्। तेन भवितव्यम्/भवनीयम्। भवान् हसेत्। भवता हसितव्यम्/हसनीयम्।

**उदाहरणानि -**

(१) सः ग्रन्थं पठेत्। तेन ग्रन्थः पठितव्यः/पठनीयः। तेन ग्रन्थौ पठितव्यौ/ पठनीयौ। तेन ग्रन्थाः पठितव्याः/पठनीयाः।

(२) बालिका उद्यानात् पुष्पम् आनयेत्। बालिकया उद्यानात् पुष्पम् आनेतव्यम्/आनयनीयम्। बालिकया पुष्पे आनेतव्ये/आनयनीये। बालिकया पुष्पाणि आनेतव्यानि/आनयनीयानि।

(३) भवन्तः गृहकार्यं कुर्युः। भवद्भिः गृहकार्यं कर्तव्यम्/करणीयम्। भवद्भिः गृहकार्ये कर्तव्ये/करणीये। भवद्भिः गृहकार्याणि कर्तव्यानि/करणीयानि।

(४) त्वं सखीं पृच्छेः। त्वया सखी प्रष्टव्या/प्रच्छनीया। त्वया सख्यौ प्रष्टव्ये/प्रच्छनिये। त्वया सख्यः प्रष्टव्याः/प्रच्छनीयाः।

# कृदन्ताव्ययानि

## 'क्त्वा' प्रत्ययः -

**समानकर्तृकयोः पूर्वकाले** *(पा.सू.३.४.२१)*

यत्र वाक्ये क्रियाद्वयं भवति। कर्ता समानो वर्तते। विद्यमाने क्रियाद्वये या क्रिया पूर्वं भवति तत्र क्त्वा प्रत्ययः भवति। **यथा** - देवदत्तः खादति, देवदत्तः विद्यालयं गच्छति। देवदत्तः खादित्वा विद्यालयं गच्छति। अत्र वाक्ये देवदत्त इति समानः कर्ता अस्ति। क्रियाद्वयम् अपि अस्ति खादति गच्छति च। तत्र खादनक्रिया पूर्वं भवति, अनन्तरं गमनक्रिया भवति। अतः खादति इत्यस्मात् क्त्वा प्रत्ययः भवति।

**अत्र ध्यातव्यम् - समासेऽनञ्पूर्वे क्त्वो ल्यप्** *(पा.सू. ७.१.३७)* - अव्ययपूर्वपदेऽनञ्समासे क्त्वा-प्रत्ययस्य स्थाने ल्यबादेशो भवति। यथा - आगम्य (आङ् + गम् + ल्यप्)। शिष्यः उपविश्य वेदम् अधीते। गुरुः उत्थाय उपदेशं ददाति।

**उदाहरणानि -**

१. पिता मध्याह्ने भुङ्क्ते। विश्राम्यति। पिता मध्याह्ने भुक्त्वा विश्राम्यति।

२. शिशुः पयः पिबति। निद्राति। शिशुः पयः पीत्वा निद्राति।

३. बालकाः अक्रीडन्। गृहं प्रविष्टवन्तः। बालकाः क्रीडित्वा गृहं प्रविष्टवन्तः।

४. रामः बाणम् अक्षिपत्। रावणं हतवान्। रामः बाणं क्षिप्त्वा रावणं हतवान्।

५. तनुश्रीः भगिनी गीतं श्रावयतु। अस्माकं मनः रञ्जयतु। तनुश्रीः भगिनी गीतं श्रावयित्वा अस्माकं मनः रञ्जयतु।

## 'तुमुन्' प्रत्ययः -

**तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** *(पा.सू. ३.३.१०)*

यस्मिन् वाक्ये क्रियाद्वयं भवति कर्ता च समानो भवति, तत्र क्रियाद्वये या क्रिया अपरक्रियायाः निमित्तं भवति, तया क्रियया सह तुमुन् प्रत्ययो भवति। **यथा -** देवदत्तः भोजनं करोति। देवदत्तः भोजनालयं गच्छति। देवदत्तः भोजनं कर्तुं भोजनालयं गच्छति। अत्र वाक्ये देवदत्त इति कर्ता समानोऽस्ति। भोजनकरणं गमनं च इति क्रियाद्वयम् अस्ति। अत्र भोजनक्रिया गमनक्रियायाः निमित्तं भवति। किमर्थं गच्छति इत्युक्ते भोजनं करोति अतः गच्छति। एवं रूपेण भोजनक्रिया गमनक्रियायाः निमित्तम् अभवत्। अत एव निमित्तभूता या क्रिया तया क्रियया सह अर्थात् भोजनक्रियया सह तुमुन् प्रत्ययोऽभवत्।

**उदाहरणानि -**

(१) सः पठति। विद्यालयं गच्छति । सः पठितुं विद्यालयं गच्छति।

(२) भक्ताः देवं पश्यन्ति। मन्दिरं गच्छन्ति। भक्ताः देवं द्रष्टुं मन्दिरं गच्छन्ति।

(३) वयं ज्ञानं प्राप्नुमः। अध्ययनं कुर्मः। वयं ज्ञानं प्राप्तुम् अध्ययनं कुर्मः।

(४) भवन्तः शुद्धं लिखेयुः। व्याकरणकक्ष्याम् आगच्छेयुः। भवन्तः शुद्धं लेखितुं व्याकरणकक्ष्याम् आगच्छेयुः।

(५) बालकः विद्यालयं गच्छति। विद्यालयवेशं परिदधाति। बालकः विद्यालयं गन्तुं विद्यालयवेशं परिदधाति।

# शब्दार्थाः

| | |
|---|---|
| कन्दुकम् | कन्दुकः |
| अदृश्यत् | अवालोक्यत |
| पृच्छ्यस्व | त्वां पृच्छ |
| आहूये | अहमाहूतः |
| गंस्यते | यास्यते |
| आनेष्यन्ते | आहरिष्यन्ते |
| उपदिशतीम्/उपदिशन्तीम् | उपदेशं ददती अस्ति या ताम् |
| अवशिष्यते | तिष्ठति |
| उड्डीयमानेन | उड्डयमानेन |
| सेवमानाय | सेवां कुर्वते |
| कम्पमानात् | एजतः |
| अतीतकालबोधकः | भूतकालबोधकः |
| आरक्षिकाः | रक्षाकर्त्र्यः |

# अभ्यासः

१. **एकेन वाक्येन प्रश्नान् समाधत्त -**

(क) प्रयोगाः कतिविधाः ?

(ख) अकर्मकधातुभ्यः कौ प्रयोगौ भवतः ?

(ग) कस्मिन् प्रयोगे कर्मपदं द्वितियाविभक्त्यन्तं भवति ?

(घ) कर्मणि-प्रयोगे क्रियापदं किं पदानुसारं भवति ?

(ङ) 'विदुषा ग्रन्थाः लिख्यन्ते' अयं कीदृशः प्रयोगः ?

२. **पूर्णवाक्येन उत्तरत -**

(क) कर्मणि प्रयोगे कर्ता कस्यां विभक्तौ भवति ?

(ख) ‘त्वं मिलेः’ इत्यस्य भावे प्रयोगं लिखत ।

(ग) शतृ-प्रत्ययः केभ्यः धातुभ्यः भवति ।

(घ) शतृ-प्रत्ययान्तेन एकं वाक्यं रचयत ।

(ङ) ‘शेते’ इत्यस्य पुंलिङ्गे शानच्-प्रत्ययान्तं रूपं किम् ?

## ३. रिक्तस्थानं पूरयत -

(क) गमनार्थकानां धातूनां क्त-प्रत्यये .................... कर्मणि च प्रयोगो भवति।

(ख) भावे प्रयोगे कर्तृपदं .................... विभक्तौ भवति।

(ग) ‘पठति’ इत्यस्य शत्रन्तस्य स्त्रीलिङ्गे .................... इति रूपम्।

(घ) .................... (सः) व्याघ्रः दृष्टः।

(ङ) ‘क्तवतु’ प्रत्ययः .................... प्रयोगे भवति।

(च) तव्यत् अनीयर् च प्रत्ययौ .................... च भवतः।

## ४. समुचितं मेलयत -

| | |
|---|---|
| (क) भूतकालार्थे प्रयुज्येते | पठितव्यः |
| (ख) गन्तुम् | शानच् |
| (ग) आत्मनेपदिभ्यः | अव्ययम् |
| (घ) समानकर्तृकयोः | जिताः |
| (ङ) पाण्डवैः कौरवाः | क्तक्तवतू |
| (च) तेन ग्रन्थः | पूर्वकाले |

## ५. समुचितं विकल्पं चिनुत -

(क) .................... (धावन्तः/धावन्त्यः) बालकाः अपतन्।

(ख) .................... (खादन्ती/खादती) सा वार्तालापं करोति।

(ग) .................... (गच्छता/गच्छन्त्या) पथिकेन मार्गः पृष्टः।

(घ) .................... (कम्पमानात्/कम्पमानायाः) वृक्षात् फलं पतितम्।

(ङ) .................... (शयानं/शयमानं) शिशुं मा जागरय।

(च) विद्याम् .................... (आददानस्य/आददानायाः) शिष्यस्य मेधां पश्य।

(छ) शिशुः पयः .................... (पित्वा/पीत्वा) निद्राति।

(ज) बालकः .................... (पठितुं/पठतुं) वेदपाठशालां गच्छति।

(झ) भवता विद्यालयः .................... (गन्तव्यः/गन्तव्यम्)।

(ञ) युष्माभिः पुस्तके .................... (पठितम्/पठिते)।

६. **कोष्ठकात् चित्वा रिक्तस्थानं पूरयत -**

| प्रष्टव्या, | पतितम्, | विद्यमानम्, | पठते, | गायन्, | गतवत् |
|---|---|---|---|---|---|

(क) ज्ञानेशः गीतं .................... वेदपाठशालां गच्छति।

(ख) .................... पुस्तकम् उत्पीठिकायां स्थापयतु ।

(ग) श्लोकं .................... बालकाय फलं ददातु ।

(घ) .................... लोकयानम् अहं दृष्टवान्।

(ङ) तया सखी ....................।

(च) वृक्षे .................... फलं कपिः खादति ।

७. **प्रयोग-परिवर्तनं कुरुत -**

**यथा - बालः ग्रन्थं पठति। बालेन ग्रन्थः पठयते।**

(क) शिष्यः गुरुम् अनमत्।

(ख) सा युष्मान् पृच्छति।

(ग) बालिकाः हसन्ति।

(घ) भक्तः देवं पश्यति।

(ङ) शिशवः अश्वशकटम् आरोहन्।

(च) बालिके विद्यालयं गच्छतः।

(छ) वानरः फलं खादति।

८. **कोष्ठके विद्यमानानां पदानां व्युत्पत्तिं दर्शयत -**

**यथा - पठन् = पठ्+शतृ।**

| गन्तव्यम्, | अध्ययनीयम्, | लिखितः, | दृष्टवान्, | खादन्, | वर्धमानम् |
|---|---|---|---|---|---|

## योग्यता-विस्तारः

कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात् सकर्मकः। अकर्मकः कर्मशून्यः। **"लटः शतृशानचावप्रथमसमानाधिकरणे"** - इत्यनेन सूत्रेण धातोः लट्-लकारस्य स्थाने वर्तमानकालार्थे शतृ-शानचौ आदेशौ भवतः।

**शप्श्यनोर्नित्यम्** *(७.१.८१)* भ्वादिभ्यः दिवादिभ्यश्च धातुभ्यः यः शतृप्रत्यय-अवयवः तदन्तस्य नुम् आगमः भवति स्त्रीलिङ्गे तथा नपुंसकलिङ्गस्य प्रथमाद्वितीययोः द्विवचने परे। यथा - गच्छन्ती याने। गच्छन्ती बालिका।

**आच्छीनद्योर्नुम्** *(७.१.८०)* - अवर्णात् परस्य शतृः विकल्पेन नुमागमः भवति स्त्रीलिङ्गे तथा नपुंसकलिङ्गस्य प्रथमाद्वितीययोः द्विवचने परे। यथा - याती/यान्ती याने, याति/यान्ती बालिका।

**वा नपुंसकस्य** *(७.१.७९)* - जुहोत्यादिगणीयेभ्यः यः शतृ-प्रत्ययः तदन्तस्य नपुंसक-लिङ्गस्य विकल्पेन नुमागमो भवति। यथा - ज्ञानं ददति। ददन्ति पुस्तकानि तत्र सन्ति।

**नाभ्यस्ताच्छतुः** *(७.१.७८)* - जुहोत्यादिगणीयेभ्यः धातुभ्यः परस्य शतृः 'नुम्' न भवति। यथा - बालकः लेखनीं ददत् अस्ति । जाग्रतम् आरक्षकं वदतु ।

**कर्तुर्हि प्रथमा बोध्या क्रिया कर्त्रनुसारिणी।**
**कर्मणस्तु द्वितीया स्यात् वचनं कर्तृवन्मतम्॥ १॥**
**कर्मणः प्रथमा बोध्या क्रिया कर्मानुसारिणी।**
**स्यात्सार्वधातुके यक् च धातोरप्यात्मनेपदम्॥**
**कर्तुः स्थाने तृतीया स्यात् कर्मवाच्यस्य संस्थितिः॥२॥**
**भाववाच्येऽन्यपुरुषे वचनं चैकमीरितम्।**
**कर्तुः स्थाने तृतीया स्यात् सर्वत्रैषः क्रमो मतः॥३॥**

**विविधधातूनां कृत्-प्रत्ययेषु पुंलिङ्गे रूपम् -**

| धातुः | क्त | क्तवतु | तुमुन् | क्त्वा/ल्यप् | तव्यत् | अनीयर् |
|---|---|---|---|---|---|---|
| गम् | गतः | गतवान् | गन्तुम् | गत्वा | गन्तव्यः | गमनीयः |
| पठ् | पठितः | पठितवान् | पठितुम् | पठित्वा | पठितव्यः | पठनीयः |

| | | | | | | |
|---|---|---|---|---|---|---|
| लिख् | लिखितः | लिखितवान् | लेखितुम् | लिखित्वा | लेखितव्यः | लेखनीयः |
| खाद् | खादितः | खादितवान् | खादितुम् | खादित्वा | खादितव्यः | खादनीयः |
| पा | पीतः | पीतवान् | पातुम् | पीत्वा | पातव्यः | पानीयः |
| नी | नीतः | नीतवान् | नेतुम् | नीत्वा | नेतव्यः | नयनीयः |
| नृत् | नृत्तः | नृत्तवान् | नर्तितुम् | नर्तित्वा | नर्तितव्यः | नर्तनीयः |
| ह्वेञ् | आहूतः | आहूतवान् | आह्वातुम् | आहूय | आह्वातव्यः | आह्वानीयः |
| प्रच्छ् | पृष्टः | पृष्टवान् | प्रष्टुम् | पृष्ट्वा | प्रष्टव्यः | प्रच्छनीयः |
| कृ | कृतः | कृतवान् | कर्तुम् | कृत्वा | कर्तव्यः | करणीयः |
| दा | दत्तः | दत्तवान् | दातुम् | दत्वा | दातव्यः | दानीयः |
| ज्ञा | ज्ञातः | ज्ञातवान् | ज्ञातुम् | ज्ञात्वा | ज्ञातव्यः | ज्ञानीयः |

# चतुर्थः पाठः

## स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्

प्रस्तुतोऽयमंशः वैदिकवाङ्मये अद्वितीयस्थानवत्याः तैत्तिरीयोपनिषदः एकादशानुवाकस्य शिक्षावल्लीतः उद्धृतोऽस्ति। उपनिषदो वेदस्य ज्ञानाकररूपेण अभिज्ञायन्ते। उपनिपूर्वकात् 'षद्लृ विशरणगत्यवसादनेषु' इत्यस्माद्धातोः क्विप्प्रत्ययेन 'उपनिषद्' इति पदं निष्पद्यते। गुरोः समीपे सविनयम् उपस्थितिः 'उपनिषद्' इत्युच्यते। अस्यां गुरुपरम्परायाम् अध्ययनानन्तरम् आचार्येण शिष्येभ्यः जीवनोपयोगी अयमुपदेशः प्रदत्तः। अयं मनोरमोपदेशः सहजभावेन प्रतिपादितः, यत् साक्षात् हृदयं स्पृशति।

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनम् आहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्॥ १॥

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि॥ २॥

नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्॥ ३॥

ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। एष आदेश। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्॥ ४॥

# शब्दार्थः

| | |
|---|---|
| वेदः | श्रुतिः, आम्नायः, छन्दः, (विद् + घञ्) ज्ञानम् |
| अन्तेवासिनम् | गुरोरन्ते समीपे विद्यामध्येतुं वसति यः, तम् |
| अनुशास्ति | उपदिशति |
| प्रमदः | अत्यानन्दः, अलसता |
| मा व्यवच्छेत्सीः | मा छिन्धि |
| अनवद्यानि | अनिन्द्यानि |
| सुचरितानि | श्रेष्ठकर्माणि |
| उपास्यानि | उपासितुं योग्यानि |
| श्रेयांसः | श्रेष्ठाः |
| प्रश्वसितव्यम् | सम्मानस्य योग्यः |
| संविदा | कर्तव्यभावेन |
| संमर्शिनः | विचारशीलाः |
| आयुक्ताः | स्वतन्त्रनिर्णये समर्थः |
| अलूक्षाः | कोमलाः |

# अभ्यासः

१. **संक्षेपेण उत्तरत -**

(क) पाठोऽयं कुतः स्वीकृतः ?

(ख) धर्मात् किं न कर्त्तव्यम् ?

(ग) आचार्यः कमनूच्य कमनुशास्ति ?

(घ) देवपितृकार्याभ्यां किं न कर्त्तव्यम् ?

(ङ) त्वया कानि उपास्यानि ?

## २. अधोलिखितान् प्रश्नान् पूर्णवाक्येन समाधत्त -

(क) गुरोः कीदृशानि कर्माणि सेवितव्यानि ?

(ख) त्वं किं कृत्वा प्रजातन्तुं न व्यवच्छेत्सीः ?

(ग) अन्तेवासिनः कर्मविचिकित्सा विषये कथं वर्तेरन् ?

(घ) काभ्यां न प्रमदितव्यम् ?

(ङ) ब्राह्मणाः कीदृशाः स्युः ?

## ३. रिक्तस्थानानि पूरयत -

(क) धनमाहृत्य ................................... मा व्यवच्छेत्सीः।

(ख) धर्मान्न ..............................................................।

(ग) ........................ पितृदेवो भव .............................।

(घ) यान्यस्माकं ..................... तानि ........................।

(ङ) एवम् ..............................................................।

## ४. अधोलिखितानां शब्दानां सन्धिविच्छेदं कृत्वा सन्धिसूत्राणि निर्दिशत -

| | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|
| (क) आचार्योऽन्तेवासिनम् | ............+........... | .................. |
| (ख) स्वाध्यायान्मा | ............+........... | .................. |
| (ग) व्यवच्छेत्सीः | ............+........... | .................. |
| (घ) सत्यान्न | ............+........... | .................. |
| (ङ) यान्यनवद्यानि | ............+........... | .................. |
| (च) यान्यस्माकम् | ............+........... | .................. |
| (छ) त्वयोपास्यानि | ............+........... | .................. |
| (ज) चास्मच्छ्रेयांसः | ............+........... | .................. |
| (झ) त्वयाऽऽसनेन | ............+........... | .................. |
| (ञ) वेदोऽपनिषद् | ............+........... | .................. |
| (ट) चैतदुपास्यम् | ............+........... | .................. |

५. **अधोलिखिते वाक्ये संस्कृतभाषया-मातृभाषया-आङ्ग्लभाषया वा व्याख्यात -**

(क) स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।

(ख) यान्यस्माकं सुचरितानि तानि त्वयोपस्यानि।

६. **अधोनिर्दिष्टपदानि समानार्थकपदैः योजयत -**

| | |
|---|---|
| (क) अनूच्य | अरूक्षाः |
| (ख) संविदा | लज्जया |
| (ग) ह्रिया | अनुपालनीयम् |
| (घ) अलूक्षाः | सद्भावनया |
| (ङ) उपास्यम् | सम्बोध्य |

७. **मञ्जूषायां प्रदत्तानां पदानां प्रकृति-प्रत्ययविभागः क्रियताम् -**

| |
|---|
| अनुशासनम्, वर्तेथाः, उपास्यम्, प्रश्वसितव्यम्, धर्मकामाः |

८. **अधोलिखितानां समस्तपदानां विग्रहवाक्यसहितं समासनाम लिखित -**

| | विग्रहः | समासनाम |
|---|---|---|
| आचार्यदेवः | .................. | .................. .................. |
| मनोरमोपदेशः | .................. | .................. .................. |
| अश्रद्धा | .................. | .................. .................. |
| जीवनोपयोगी | .................. | .................. .................. |
| स्वाध्यायप्रवचने | .................. | .................. .................. |
| अतिथिः | .................. | .................. .................. |

९. **कोष्ठकात् उचितोत्तरं चित्वा शून्यस्थानानि पूरयत -**

(क) 'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' इति पङ्क्तिः तैत्तिरीयोपनिषदि शिक्षावल्ल्याम् .................. विद्यते। (द्वादशानुवाके/एकादशानुवाके)।

(ख) गुरोः समीपे सविनयम् उपस्थितिः .............. उच्यते। (उपनिषद्/उपनिशद्)

(ग) यानि ............... कर्माणि तानि सेवितव्यानि नो इतराणि। (अनवद्यानि/अवद्यानि)

(घ) .............. न प्रमदितव्यम्। (धर्मात्/दुःखात्)

(ङ) ............ देयम्। (श्रद्धया/अश्रद्धया)

१०. **वाक्येषु विद्यमानानि दुष्टानि पदानि संशोध्य लिखत -**

यथा - सत्यान्न प्रमदितव्या। कुषलान्न प्रमदितव्यः।

सत्यान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्।

(क) आचार्याय प्रियं धनः आहृत्वा प्रजातन्तुं मा व्यवच्छेत्सीः।

(ख) स्वाध्यायप्रवचनाभ्यां न प्रमदितव्या।

(ग) यान्यवद्यानि कर्माणि तानि सेवितव्या नो इतरानि।

(घ) यान्यष्माकं सुचरिताणि तानि त्वयोपाश्यानि।

(ङ) तेषु त्वयाऽऽसनेन प्रष्वशितव्यम्।

## योग्यताविस्तरः

**उपनिषद्-शब्दार्थः** - उप + नि उपसर्गपूर्वकात् विशरण-गत्यवसादनार्थकात् 'षद्लृ' धातोः क्विपि उपनिषत्-शब्दो निष्पद्यते। उप समीपे नि निश्चयेन सत् स्थानमिति तत्त्वज्ञानार्थं गुरोः समीपे सविनयं स्थितिः उपनिषद् इत्युच्यते। मानवस्य इहलौकिकपारलौकिकयोः यथार्थज्ञानप्राप्तये परमोपलब्धिस्वरूपाः उपनिषदः निश्चितरूपेण भारतीयसंस्कृतेः अद्वितीयाः निधयः सन्ति। उपनिषत्सु संवादमाध्यमेन जीवजगद्ब्रह्मविषयकतत्त्वानां निरूपणमस्ति। उपनिषदः वेदानां ज्ञानकाण्डत्वेन प्रसिद्धा वर्तन्ते। अस्मात् कारणाद् विविधवैदिकशाखानां दार्शनिकचिन्तनसन्दर्भे उपनिषदां विशिष्टस्थानमस्ति। चतुर्णां वेदानां पृथक् पृथग् उपनिषदः वर्त्तन्ते। प्रमुखोपनिषदां परिगणनमित्थं कृतम्। ईश-केन-कठ-प्रश्न-मुण्डकमाण्डूक्य-तित्तिरि-बृहदारण्यक-छान्दोग्यानि। तैत्तिरीयोपनिषद् कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायाः ब्राह्मणग्रन्थस्य अन्तिमो भागः तैत्तिरीयारण्यकमिति कथ्यते। अस्मिन् आरण्यके दशप्रपाठकाः विद्यन्ते। एतेषु प्रपाठकेषु सप्तमतः नवमप्रपाठकपर्यन्तं यो भागः स एव तैत्तिरीयोपनिषद् इति कथ्यते। शिक्षावल्ली, ब्रह्मानन्दवल्ली, भृगुवल्ली च एतेषां क्रमशः नामानि। पाठोऽयं शिक्षावल्ल्याः स्वीकृतोऽस्ति। शिक्षावल्ली प्रपाठके ओङ्कारस्य महत्त्ववर्णनं धर्माचरणसम्बन्धिविचारश्च विशदरूपेण प्रस्तुतः।

**ध्येयवाक्यानि -**

'यत्र विश्वं भवत्येकनीडम्', अहं ब्रह्मास्मि, योगः कर्मसु कौशलम्, शन्नो मित्रः शं वरुणः, योऽनूचानः स नो महान्, तमसो मा ज्योतिर्गमय, श्रुतं मे गोपाय, सत्यान्न प्रमदितव्यम्, सत्यमेव जयते नानृतम्, सत्यं ज्ञानमनन्तं ब्रह्म, पावका नः सरस्वती, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, 'निष्ठा धृतिः सत्यम्', 'विद्ययाऽमृतमश्नुते', 'ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत', 'शरीरमाद्यं खलु धर्मसाधनम्', 'ज्ञानविज्ञानं विमुक्तये', 'तत्त्वं पुषन्नपावृणु', 'प्रज्ञानं ब्रह्म', 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी', 'अहर्निशं सेवामहे, आकाशेन शत्रुन् जहि', 'कृण्वन्ते विश्वमार्यम्', 'नभस्स्पृशं दीप्तम्', 'यतो धर्मस्ततो जयः', 'बलिदानं वीरलक्ष्यम्', 'धर्मो रक्षति रक्षितः', 'सा विद्या या विमुक्तये', 'आचारः परमो धर्मः'।

# पञ्चमः पाठः

## अथ प्रत्यय-प्रकरणम्

प्रकृत्युत्तरो जायमानः प्रत्याययति ज्ञापयति बोधयति वा प्रकृत्यर्थान् सः प्रत्ययः। अथवा प्रत्याय्यन्ते प्रकृत्यर्थाः येन सः प्रत्ययः। प्रति इत्युपसर्गपूर्वकाद् णिजन्तात् 'इण् गतौ' धातोः भावे करणे वार्थे अच्-प्रत्यये, प्रत्ययः इति शब्दो निष्पद्यते। प्रकृत्या सह प्रत्ययः मिलित्वा अर्थपरिवर्तनं जनयति। प्रत्ययाः सामान्यतया द्विविधा भवन्ति।




### १. सुप्-प्रत्ययाः

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** *(पा.सू. ४.१.२)*

**वृत्तिः** - सु-औ-जश्-अम्-औट्-शस्-टा-भ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्-भ्यस्-ङस्-ओस्-आम्-ङि-ओस्-सुप् इमे स्वादयः एकविंशतिः प्रत्ययाः प्रातिपदिकेभ्यो विधीयन्ते।

### २. स्त्रीप्रत्ययाः

संस्कृतभाषायां प्रातिपदिकात् स्त्रीत्वबोधनाय केचन प्रत्ययाः कल्पिताः सन्ति। ते च - टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति इति एते अष्टौ प्रत्ययाः स्त्रीत्वबोधनाय प्रातिपदिकात् भवन्ति। 'स्त्रियाम्' इति सूत्रस्य अधिकारे एते प्रत्यया विधीयन्ते।

### टाप् प्रत्ययः

**अजाद्यतष्टाप्** *(पा.सू. ४.१.४)*

**पदविभागः** - अजाद्यतः (पञ्चम्येकवचनम्), टाप् (प्रथमैकवचनम्)। द्विपदात्मकमिदं सूत्रम्।

**वृत्तिः** - अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप्स्यात्। अजा। एडका। अश्वा। चटका। मूषिका। बाला। वत्सा। होडा। मन्दा। विलाता। मेधा। गङ्गा। सर्वा इत्यादि।

| टाप् प्रत्ययः | |
|---|---|
| अज + टाप् = अजा | गङ्ग + टाप् = गङ्गा |
| अश्व + टाप् = अश्वा | सर्व + टाप् = सर्वा |
| बाल + टाप् = बाला | वत्स + टाप् = वत्सा |
| होड + टाप् = होडा | ज्येष्ठ + टाप् = ज्येष्ठा |
| कोकिल + टाप् = कोकिला | खट्व + टाप् = खट्वा |
| आचार्य + टाप् – आचार्य | चटक + टाप् = चटका |
| मूषक + टाप् = मूषिका | एडक + टाप् = एडका |

## ङीप् प्रत्ययः

**टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः** *(पा.सू. ४.१.१५)*

**पदविभागः** - टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्करपः (प्रथमाबहुवचनम्)। एकपदमिदं सूत्रम्।

**वृत्तिः** - अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप्स्यात्।

**उदाहरणानि** - कुरुचरी (ट)। नदट् नदी। देवट् देवी। सौपर्णेयी (अण्)। ऐन्द्री (अण्)। औत्सी (अञ्)। ऊरद्वयसी (द्वयसच्)। ऊरुदघ्नी (दघ्नच्)। ऊरुमात्री (मात्रच्)। पञ्चतयी (तयप्)। आक्षिकी (ठक्)। लावणिकी (ठञ्)। यादृशी (कञ्)। इत्वरी (क्वरप्)। (नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्) - स्त्रैणी (नञ्)। पौंस्नी (स्नञ्)। शाक्तिकी (ईकक्)। याष्टीकी (ईकक्)। आढ्यङ्करणी (ख्युन्)। तरुणी। तलुनी।

**उगितश्च** *(पा.सू. ४.१.४)*

**पदविभागः** - उगितः (पञ्चम्येकवचनम्), च (अव्ययम्)। द्विपदात्मकमिदं सूत्रम्।

**वृत्तिः** - उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात्। भवती। भवन्ती। पचन्ती। दीव्यन्ती।

| ङीप् प्रत्ययः | |
|---|---|
| भवत् + ङीप् = भवन्ती | श्रीमत् + ङीप् = श्रीमती |
| पचत् + ङीप् = पचन्ती | गन्धवत् + ङीप् = गन्धवती |
| दीव्यत् + ङीप् = दीव्यन्ती | आयुष्मत् + ङीप् = आयुष्मती |

| | |
|---|---|
| गच्छत् + ङीप् = गच्छन्ती | रूपवत् + ङीप् = रूपवती |
| पठत् + ङीप् = पठन्ती | बुद्धिमत् + ङीप् = बुद्धिमती |
| लिखत् + ङीप् = लिखन्ती | |

**ङीष् प्रत्ययः**

**षिद्गौरादिभ्यश्च** *(पा.सू. ४.१.४१)*

**पदविभागः** - षिद्गौरादिभ्यः (पञ्चमीबहुवचनम्), च (अव्ययम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः** - षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष् स्यात्। गार्ग्यायणी। नर्तकी। गौरी। अनडुही। अनड्वाही। आकृतिगणोऽयम्।

| ङीष् प्रत्ययः | |
|---|---|
| नर्तक + ङीष् = नर्तकी | अनडुह् + ङीष् = अनडुही |
| रजक + ङीष् = रजकी | गार्ग्यायण + ङीष् = गार्ग्यायणी |
| गौर + ङीष् = गौरी | खनक + ङीष् = खनकी |

**ङीप् प्रत्ययः**

**वयसि प्रथमे** *(पा.सू. ४.१.२०)*

**पदविभागः** - वयसि (सप्तम्येकवचनम्), प्रथमे (सप्तम्येकवचनम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः** - प्रथमे वयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात्। कुमारी।

**ङीष् प्रत्ययः**

**जातेरस्त्रीविषयादयोपधात्** *(पा.सू. ४.१.६३)*

**पदविभागः** - जातेः (पञ्चम्येकवचनम्), अस्त्रीविषयाद् (पञ्चम्येकवचनम्), अयोपधात् (पञ्चम्येकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः** - जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्। कटी। वृषली। कठी। बह्वृची। जातेः किम् ? मुण्डा। अस्त्रीविषयात् किम् ? बलाका। अयोपधात्किम् ? क्षत्रिया। योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः (वार्तिकम्)। हयी। गवयी। मुकयी। हलस्तद्धितस्येति यलोपः। मनुषी। मत्स्यस्य ङ्याम्। यलोपः। मत्सी।

## ङीन् प्रत्ययः

**शार्ङ्गरवाद्यञो ङीन्** *(पा.सू. ४.१.७३ )*

**पदविभागः** - शार्ङ्गरवाद् (पञ्चम्येकवचनम्), यञः (पञ्चम्येकवचनम्), ङीन् (प्रथमैकवचनम्)। त्रिपदात्मकं सूत्रम्।

**वृत्तिः** - शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। बैदी। ब्राह्मणी। नृरनरयोर्वृद्धिश्च (वार्तिकम्)। नारी।

| ङीन् प्रत्ययः |
|---|
| शार्ङ्गरव + ङीन् = शार्ङ्गरवी |
| ब्राह्मण + ङीन् = ब्राह्मणी |
| बैद + ङीन् = बैदी |
| नृ/नर + ङीन् = नारी |

## ति प्रत्ययः

**यूनस्तिः** *(पा.सू. ४.१.७७)*

**पदविभागः** - यूनः (पञ्चम्येकवचनम्), तिः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - युवञ्छब्दात् स्त्रियां तिः प्रत्ययः स्यात्। युवतिः

**उदाहरणम्** - युवन् + ति = युवतिः।

## ३. तद्धितप्रत्ययाः -

एतेऽपि प्रातिपदिकेभ्यो विधीयन्ते। एतत्प्रत्ययान्ताः शब्दाः "कृत्तद्धितसमासाश्च" इत्यनेन सूत्रेण प्रादिपदिकसंज्ञां लभन्ते। अधः मुख्यतया एते प्रत्ययाः ससूत्रं प्रस्तूयन्ते।

ते च यथा - अण्, ढक्, घ, ख, ठञ्, मतुप्, तमप्, इष्ठन्, तरप्, ईयसुन्,।

## अण् प्रत्ययः

**प्राग्दीव्यतोऽण्** *(पा.सू. ४.१.८३)*

**पदविभागः** - प्राक् (अव्ययम्), दीव्यतः (पञ्चम्येकवचनम्), अण् (प्रथमैकवचनम्)।

**वृत्तिः** - प्राग्दीव्यतीयेष्वर्थेषु समर्थेभ्यः प्रथमाद् अण् प्रत्ययो भवति औत्सर्गिकरूपेण। अधिकारसूत्रमिदम्। 'तेन दीव्यति......' इत्यतः प्रागणधिक्रियते।

**उदाहरणानि** - गुरोः इदम् = गुरु + अण् = गौरवम्। सूर्ये जातः = सूर्य + अण् = सौरः। उपगोः अपत्यम् = उपगु + अण् = औपगवः।

### अन्ये अण्-प्रत्ययान्तशब्दाः

| | अर्थः | शब्द + अण् | रूपाणि |
|---|---|---|---|
| १. | पर्वतस्य अपत्यं स्त्री | पर्वत् + अण् | पार्वती |
| २. | रघोः अपत्यं पुमान् | रघु + अण् | राघवः |
| ३. | मनोः अपत्यं पुमान् | मनु + अण् | मानवः |
| ४. | शिवस्य अपत्यं पुमान् | शिव + अण् | शैवः |
| ५. | पृथायाः अपत्यं पुमान् | पृथु + अण् | पार्थः |
| ६. | गङ्गायाः अपत्यं पुमान् | गङ्गा + अण् | गाङ्गः |
| ७. | व्याकरणम् अधीते वेत्ति वा | व्याकरण + अण् | वैयाकरणः |

### ढक् प्रत्ययः

**स्त्रीभ्यो ढक्** *(पा.सू. ४.१.१२०)*

**पदविभागः** - स्त्रीभ्यः (पञ्चमीबहुवचनम्), ढक् (प्रथमैकवचनम्)।

**वृत्तिः** - स्त्रीप्रत्ययान्तेभ्यो ढक् प्रत्ययः स्यात्। वैनतेयः।

**उदाहरणम्** - विनतायाः अपत्यं पुमान् = विनता+ढक् = वैनतेयः। कुन्त्याः अपत्यं पुमान् = कुन्ती+ढक् = कौन्तेयः। कद्र्वाः अपत्यं पुमान् = कद्रू+ढक् = काद्रवेयः।

### घखौ प्रत्ययौ

**राष्ट्रावारपाराद् घखौ** *(पा.सू. ४.२.९३)*

**पदविभागः** - राष्ट्र-अवार-पारात् (पञ्चम्येकवचनम्), घ-खौ (प्रथमाद्विवचनम्)।

**वृत्तिः** - आभ्यां क्रमाद् घखौ स्त शेषे। राष्ट्रे जातादिः राष्ट्रियः। अवारपारीणः। 'अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्। (वार्तिकम्)। अवारीणः। पारीणः। पारावारीणः। इह प्रकृतविशेषाद् घाटयष्ठ्युट्युलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते।

**उदाहरणानि** - राष्ट्र + घ = राष्ट्रियः। अवारपार + ख = अवारपारीणः। अवारीण। पारीणः। पारावारीणः

**कालाट्ठञ्** *(पा.सू. ४.३.११)*

**पदविभागः** - कालात् (पञ्चम्येकवचनम्), ठञ् (प्रथमैकवचनम्)।

**वृत्तिः** - कालवाचिभ्यष्ठञ् स्यात्। कालिकम्। मासिकम्। सांवत्सरिकम्। अव्ययानां भमात्रे टिलोपः (वार्तिकम्)। सायंप्रातिकः। पौनःपुनिकः।

**उदाहरणानि** - मास+ठञ् = मासिकम्। वत्सर+ठञ् = वात्सरिकम्। प्रातःकाल+ठञ् = प्रातःकालिकम्।

## मतुप् प्रत्ययः

**तदस्यास्त्यस्मिन्निति मतुप्** *(पा.सू. ५.२.९४)*

**पदविभागः** - तद् (प्रथमैकवचनम्), अस्य (षष्ठ्येकवचनम्), अस्ति (तिङन्तम्), अस्मिन् (सप्तम्येकवचनम्), इति (अव्ययम्), मतुप् (प्रथमैकवचनम्)।

**वृत्तिः** - प्रथमान्तादस्यास्तीत्यर्थेऽस्मिन्नस्ति इत्यर्थे च मतुप् प्रत्ययः स्यात्। गावोऽस्यास्मिन्वा सन्ति गोमान्।

**उदाहरणानि** - गावः अस्य अस्मिन् वा सन्ति सः गोमान्। बुद्धिः अस्य अस्मिन् वा अस्ति सः बुद्धिमान्। ज्ञानम् अस्य अस्मिन् वा अस्ति सः ज्ञानवान्।

| | पुँल्लिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| **शब्दः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| गो | गोमान् | गौमन्तौ | गौमन्तः | गोमती | गोमत्यौ | गौमत्यः | गोमत् | गोमती | गोमन्ति |
| आयुस् | आयुष्मान् | आयुष्मन्तौ | आयुष्मन्तः | आयुष्मती | आयुष्मत्यौ | आयुष्मत्यः | आयुष्मत् | आयुष्मती | आयुष्मन्ति |
| रूप | रूपवान् | रूपवन्तौ | रूपवन्तः | रूपवती | रूपवत्यौ | रूपवत्यः | रूपवत् | रूपवती | रूपवन्ति |
| श्री | श्रीमान् | श्रीमन्तौ | श्रीमन्तः | श्रीमती | श्रीमत्यौ | श्रीमत्यः | श्रीमत् | श्रीमती | श्रीमन्ति |
| रस | रसवान् | रसवन्तौ | रसवन्तः | रसवती | रसवत्यौ | रसवत्यः | रसवत् | रसवती | रसवन्ति |

## तमप् इष्ठन् च प्रत्ययौ

**अतिशायने तमबिष्ठनौ** *(पा.सू. ५.३.५५)*

**पदविभागः** - अतिशायने (सप्तम्येकवचनम्), तमबिष्ठनौ (प्रथमाद्विवचनम्)।

**वृत्तिः** - अतिशयविशिष्टार्थवृत्तेः स्वार्थ एतौ स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः। लघुतमः, लघिष्ठः।

**उदाहरणानि - तमप् -** अयम् एषु अतिशयेन प्रशस्यः = प्रशस्यतमः। **इष्ठन् -** अयम् एषु अतिशयेन प्रशस्यः = श्रेष्ठः।

| | पुंल्लिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| मृदु | मृदुतमः | मृदुतमौ | मृदुतमाः | मृदुतमा | मृदुतमे | मृदुतमाः | मृदुतमम् | मृदुतमे | मृदुतमानि |
| ह्रस्व | ह्रस्वतमः | ह्रस्वतमौ | ह्रस्वतमाः | ह्रस्वतमा | ह्रस्वतमे | ह्रस्वतमाः | ह्रस्वतमम् | ह्रस्वतमे | ह्रस्वतमानि |
| निम्न | निम्नतमः | निम्नतमौ | निम्नतमाः | निम्नतमा | निम्नतमे | निम्नतमाः | निम्नतमम् | निम्नतमे | निम्नतमानि |
| शुक्ल | शुक्लतमः | शुक्लतमौ | शुक्लतमाः | शुक्लतमा | शुक्लतमे | शुक्लतमाः | शुक्लतमम् | शुक्लतमे | शुक्लतमानि |
| कृश | कृशतमः | कृशतमौ | कृशतमाः | कृशतमा | कृशतमे | कृशतमाः | कृशतमम् | कृशतमे | कृशतमानि |

## तरप् ईयसुन् च प्रत्ययौ

**द्विवचनविभज्योपपदे तरबीयसुनौ** *(पा.सू. ५.३.५७)*

**पदविभागः -** द्विवचनविभज्योपपदे (सप्तम्येकवचनम्), तरबीयसुनौ (प्रथमैकवचनम्)।

**वृत्तिः -** द्वयोरेकस्याऽतिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुः लघुतरो लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः।

**उदाहरणानि - तरप् -** अयमनयोः अतिशयेन प्रशस्यः = प्रशस्यतरः। **ईयसुन् -** अयमनयोरतिशयेन प्रशस्यः = श्रेयान्।

| | पुंल्लिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| पटु | पटुतरः | पटुतरौ | पटुतराः | पटुतरा | पटुतरे | पटुतराः | पटुतरम् | पटुतरे | पटुतराणि |
| लघु | लघुतरः | लघुतरौ | लघुतराः | लघुतरा | लघुतरे | लघुतराः | लघुतरम् | लघुतरे | लघुतराणि |
| उच्च | उच्चतरः | उच्चतरौ | उच्चतराः | उच्चतरा | उच्चतरे | उच्चतराः | उच्चतरम् | उच्चतरे | उच्चतराणि |
| गुरु | गुरुतरः | गुरुतरौ | गुरुतराः | गुरुतरा | गुरुतरे | गुरुतराः | गुरुतरम् | गुरुतरे | गुरुतराणि |
| प्रशस्य | प्रशस्यतरः | प्रशस्यतरौ | प्रशस्यतराः | प्रशस्यतरा | प्रशस्यतरे | प्रशस्यतराः | प्रशस्यतरम् | प्रशस्यतरे | प्रशस्यतराणि |

## ४. तिङ्-प्रत्ययाः

**तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्** *(पा.सू. ३.४.७८)*

**पदविभागः -** तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (प्रथमैकवचनम्)। एकपदात्मकं सूत्रमिदम्।

**वृत्तिः -** एतेऽष्टादश लादेशाः स्युः। तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् एते अष्टादश तिङ्-प्रत्ययाः धातुभ्यो विधीयन्ते।

## ५. कृत्-प्रत्ययाः -

एते प्रत्ययाः धातुभ्यो विधीयन्ते। तिङ्-प्रत्ययेभ्यो भिन्नाः कृत्-प्रत्ययाः। **यथा -** ण्वुल्, तृच्, अच्, अण्, ण्यत्, यत्, ल्युट्, क्तिन्, घञ्, शतृ, शानच्, क्त्वा, क्तवतु, ल्यप्, तुमुन्, तव्यत्, अनीयर्, इत्यादयः। इह ण्वुल्, तृच्, अण्, ल्युट्, एते प्रत्यया विमृश्यन्ते।

### ण्वुल् तृच् च प्रत्ययौ

**ण्वुल्तृचौ** *(पा.सू. ३.१.१३३)*

**पदविभागः** - ण्वुल-तृचौ (प्रथमाद्विवचनम्)।

**वृत्तिः** - धातोरेतौ स्तः। कर्तरि कृदिति कर्त्रर्थे।

**उदाहरणानि** - कृ + ण्वुल् (अक) = कारकः। कृ + तृच् (तृ) = कर्ता। हृ + ण्वुल् (अक) = हारकः। हृ + तृच् (तृ) = हर्ता। लिख् + ण्वुल् (अक) = लेखकः। लिख् + तृच् (तृ) = लेखिता।

### अण् प्रत्ययः

**कर्मण्यण्** *(पा.सू. ३.२.१)*

**पदविभागः** - कर्मणि (सप्तम्येकवचनम्), अण् (प्रथमैकवचनम्)।

**वृत्तिः** - कर्मण्युपपदे धातोरण् प्रत्ययः स्यात्। उपपदसमासः।

**उदाहरणानि** - कुम्भं करोतीति कुम्भकारः। सूत्रं करोतीति सूत्रकारः।

### ल्युट् प्रत्ययः

**ल्युट् च** *(पा.सू. ३.३.११५)*

**पदविभागः** - ल्युट् (प्रथमैकवचनम्), च (अव्ययम्)।

**वृत्तिः** - नपुंसकलिङ्गे भावे धातोः ल्युट् प्रत्ययः स्यात्।

**उदाहरणानि** - हस्+ल्युट् (अन) = हसनम्। भुज्+ल्युट् = भोजनम्। शी+ल्युट् = शयनम्। गम्+ल्युट् = गमनम्।

## शब्दार्थाः

| | |
|---|---|
| श्रेयान् | श्रेष्ठः |
| प्रशस्यतमः | श्रेष्ठः |

| | |
|---|---|
| एडका | अविः |
| श्रीमती | श्रीः अस्याः अस्ति |
| आयुष्मती | आयुः अस्याः अस्ति |
| रजकी | रजकपत्नी |
| खनकी | मूषिका |
| गार्ग्यायणी | गार्ग्यस्य पत्नी |
| बैदी | बिदस्य अपत्यं स्त्री |
| शार्ङ्गरवी | श्रृङ्गरोः पुत्री |
| पार्थः | पृथायाः पुत्रः |
| अनडुही | गौः |
| अवारपारीणः | निष्णातः |

## अभ्यासः

१. **एकवाक्येन उत्तरं दीयताम् -**

(क) सामान्यतया प्रत्ययाः कतिविधाः भवन्ति ?

(ख) "अजाद्यतष्टाप्" इति सूत्रेण किं भवति ?

(ग) अष्टौ स्त्रीप्रत्ययाः के ?

(घ) 'शार्ङ्गरवी' अत्र ङीन् केन सूत्रेण भवति ?

(ङ) द्वयोः मध्ये एकस्य अतिशये वक्तव्ये कस्य प्रत्ययस्य प्रयोगः भवति ?

(च) 'कुम्भकारः' इत्यत्र कः प्रत्ययः वर्तते ?

२. **पूर्णवाक्येन प्रश्नान् समाधत्त -**

(क) "अतिशायने तमबिष्ठनौ" इति सूत्रस्य सूत्रार्थं लिखत।

(ख) 'पार्वती' अस्मिन् उदाहरणे कः प्रत्ययः भवति ?

(ग) 'रूप + मतुप्' अत्र किं रूपं भवति ?

(घ) "षिद्गौरादिभ्यश्च" इति सूत्रस्य त्रीणि उदाहरणानि लिखत।

(ङ) "तदस्यास्त्यस्मिन्निति मतुप्" इत्यस्य पदविभागं कुरुत।

(च) 'पारावारीणः' इत्यत्र केन सूत्रेण कः प्रत्ययः ?

## ३. रिक्तस्थानानि पूरयत -

(क) वने ...................................... चरति (हरिण + ङीप्)

(ख) पिता गगनात् ...................................। (उच्च + तरप्)

(ग) छात्राणां/छात्रेषु रामः .............................। (पटु + तमप्)

(घ) रघोः अपत्यं पुमान् ..................................।(रघु + अन्)

(ङ) राजद्वारे एका .......................................... आसीत् (नर्तक + ङीष्)

(च) नपुंसकलिङ्गे भावे धातोः ......... प्रत्ययः स्यात्।

## ४. समुचितं मेलनं कुरुत -

| | |
|---|---|
| (क) रूपवान् | ढक् |
| (ख) लघुतरः | अण् |
| (ग) कृशतमः | ङीन् |
| (घ) शैवः | मतुप् |
| (ङ) बैदी | तरप् |
| (च) काद्रवेयः | तमप् |

## ५. मञ्जूषायां विद्यमानान् शब्दान् आश्रित्य वाक्यं रचयत -

| पटुतरः, निम्नतमः, श्रीमान्, राघवः, मूषिका, वैनतेयः, लेखनम् |
|---|

## ६. प्रकृतिप्रत्ययविभागः क्रियताम् -

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| गुरुतरः | ............ | ............ |
| ह्रस्वतमः | ............ | ............ |
| आयुष्मान् | ............ | ............ |
| मानवः | ............ | ............ |
| बैदी | ............ | ............ |
| राष्ट्रियः | ............ | ............ |

| | | |
|---|---|---|
| कर्ता | ............ | ............ |
| हसनम् | ............ | ............ |

### ७. उचितं पदं स्वीकृत्य शून्यस्थानं पूरयत।

(क) कर्मण्युपपदे धातोः .......... प्रत्ययो भवति। (ल्युट्/अण्)

(ख) उगिदन्तात् प्रातिपदिकात् स्त्रियां .......... प्रत्ययः स्यात्। (ङीप्/ङीष्)

(ग) स्वादयः एकविंशतिः प्रत्ययाः ...........विधीयन्ते। (धातुभ्यो/प्रातिपदिकेभ्यो)

(घ) 'घ' इति ........... प्रत्ययः। (कृत/तद्धितः)

(ङ) 'श्रेष्ठः' इति ..........प्रत्ययान्तः शब्दः। (इष्ठन्/ईयसुन्)

### ८. प्रत्ययान्तपदानि रचयत -

| क्र. | मूलशब्दः + प्रत्ययः | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| १. | धन + मतुप् | | | |
| २. | गुरु + तरप् | | | |
| ३. | रूप + मतुप् | | | |
| ४. | शुक्ल + तमप् | | | |
| ५. | प्रशस्य + तरप् | | | |

## योग्यता-विस्तारः

संस्कृतभाषायां प्रातिपदिकसंज्ञकानां शब्दानां त्रयः अर्थाः भवन्ति। जातिः व्यक्तिः लिङ्गं चेति। तत्र लिङ्गानि त्रीणि भवन्ति - पुमान्, स्त्री, क्लीबं चेति। तत्र किं पुंस्त्वं किं स्त्रीत्वं किं च नपुंसकत्वम् इति जिज्ञासायां शास्त्रकारैः त्रयाणां लिङ्गानां लक्षणं प्रोक्तम् -

**स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**

**उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥**

तत्र त्रिषु लिङ्गेषु पुंस्त्वबोधनाय नंपुसकत्वबोधनाय च प्रत्ययान्तरम् अपेक्षितं नास्ति प्रातिपदिकेनैव तेषां प्रतीतिः भवति। किन्तु स्त्रीत्वबोधनाय केचन प्रत्ययाः कल्पिताः सन्ति।

ते च -

**टाप्-डाप्-चापस्त्रय इष्यन्ते ङीप्- ङीष्- ङीन् प्रत्ययैः सह।**
**उङ् - तिभ्यां मिलिताश्चापि सन्त्यष्टौ प्रत्ययाः स्त्रियाम्॥**

**इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्** *(पा.सू. ४.१.४९)*

**पदविभागः** - इन्द्रवरुण..........मातुलाचार्याणाम् (षष्ठीबहुवचनम्), आनुक् (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - एषामानुगागमः स्यात् ङीष् च ।

**उदाहरण** - १. इन्द्राणी - इन्द्र + आनुक् + ङीष् ।
२. भवानी - भव + आनुक् + ङीष् ।
३. रुद्राणी - रुद + आनुक् + ङीष् ।
४. हिमानी - हिम + आनुक् + ङीष् ।
५. यवानी - यव + आनुक् + ङीष् ।

**ऊङुतः** *(पा.सू. ४.१.६६)*

**पदविभागः** - ऊङ् (प्रथमैकवचनम्), उतः (पञ्चम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - उकारान्तादयोपधात् मनुष्यजातिवाचिनः ऊङ् स्यात्।

**उदाहरण** - कुरु + ऊङ् = कुरूः। पिपासु+ऊङ् = पिपासूः। श्वश्रु+ऊङ् = श्वश्रूः।

**आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्** *(पा.सू. ७.१.२)*

**पदविभागः** - आयनेयीनीयियः (प्रथमाबहुवचनम्), फढखछघाम् (षष्ठीबहुवचनम्), प्रत्ययादीनाम् (षष्ठीबहुवचनम्)। त्रिपदात्मकं सूत्रमिदम्।

**वृत्तिः** - प्रत्ययादेः फस्य आयन्, ढस्य एय्, खस्य ईन्, छस्य ईय्, घस्य इय्, एते स्युः।

**उदाहरणम्** - गर्गस्य युवापत्यम् - गार्ग्यायणः। विनतायाः अपत्यम् - वैनतेयः। ग्रामे भवः ग्रामीणः। तस्य अयम् - तदीयः। मम अयम् - मदीयः। राष्ट्रे भवः राष्ट्रियः।

**कुमारत्वस्य अवस्थाविशेषः**

कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशाद् यौवनं तु ततः परम्॥

# षष्ठः पाठः

## हितं मनोहारि च दुर्लभं वचः

महाकविः भारविः संस्कृतप्रौढकविषु अन्यतमः। एष महाकविः 'किरातार्जुनीयम्' इति काव्यं रचयामास। असौ षष्ठशताब्दीयः इति विमर्शकाः वदन्ति। भारविः अल्पैः पदैः अनल्पमर्थम् अत्यन्तं मनोहरतया वर्णयति। अत एव "भारवेरर्थगौरवम्" एवं "नारिकेलफलसम्मितं वचो भारविः" इति आर्योक्तिः प्रसिद्धा। प्रस्तुतपाठ्यभागः किरातार्जुनीयस्य प्रथमसर्गात् केचिच्छ्लोकाः सङ्गृहीताः।

महाकविभारविणा महाभारतकथाम् आश्रित्य अलङ्कृतकलापक्षप्रधानशैल्या विरचितमिदं महाकाव्यम्। इदम् अष्टादशसर्गात्मकं (१८) वीररसप्रधानं च। ओजगुणयुक्तस्य किरातार्जुनीयमहाकाव्यस्य प्रथमे सर्गे वैदर्भी रीतिः वर्तते। अर्थगाम्भीर्ययुक्तं बृहत्त्रय्यां प्रथमपरिगणितं 'किरातार्जुनीयम्' नाम एकमेव महाकाव्यं समुपलभ्यते। अस्य ग्रन्थस्य शुभारम्भः 'श्री'शब्देन, सर्गान्तः 'लक्ष्मी'शब्देन च भवति। अत्र अर्जुनस्य किरातवेषधारिणा शङ्करेण सह युद्धं वर्णितम्। अत एव ग्रन्थस्य नामकरणं कृतं 'किरातार्जुनीयम इति। किरातश्च अर्जुनश्च किरातार्जुनौ (द्वन्द्वः), तौ अधिकृत्य कृतं काव्यं 'किरातार्जुनीयम्' इति। किरातार्जुन + छ ('ईय' आदेशः)। अर्जुनाय दिव्यास्त्राणां प्राप्तिरेव महाकाव्यस्य फलम्। अतः ग्रन्थस्यास्य नायकः अर्जुनः नायिका च द्रौपदी वर्तते। किरातार्जुनीयस्य कथानकस्य मूलाधारः महाभारतम् अस्ति, महाभारतस्य अष्टादशसर्गेषु वनपर्वणि किरातार्जुनीयस्य कथा विद्यते।

१. **श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**
**स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥१॥**

**अन्वयः** - कुरूणाम् अधीपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त वर्णिलिङ्गी स वनेचरः विदितः द्वैतवने युधिष्ठिरं समाययौ।

**भावार्थः** - कौरवाणां राज्ञः दुर्योधनेन द्यूतक्रीडायां विजितः सन् राज्यभ्रष्टो धर्मराजो युधिष्ठिरो द्वैतवने न्यवसत्। युधिष्ठिरः दुर्योधनस्य प्रजापालननीतिं विज्ञातुं वनेचरं (गुप्तचरं) नियुक्तवान्। ब्रह्मचारिवेषधारी स वनेचरः दुर्योधनस्य सर्वं वृत्तान्तं विदित्वा द्वैतवने युधिष्ठिरस्य समीपं प्रत्यागच्छत्।

२. **कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।**
**न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥२॥**

**अन्वयः** - कृतप्रणामस्य सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः, तस्य मनः न विव्यथे हि हितैषीणः मृषा प्रियं प्रवक्तुं न इच्छन्ति।

**भावार्थः** - दुर्योधनस्य विदितवृत्तान्तो वनेचरः युधिष्ठिरं प्रणम्य यथा आसीत् तथा विवृणोति, तत्र तस्य मनः व्यथितं न बभूव, यतो हि हितैषिणो जनाः सर्वदा सत्यमेव वदन्ति, ते कदापि मिथ्या प्रियं वक्तुं नैव प्रभवन्ति।

३. **क्रियासु युक्तैर्नृपचारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।**
**अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥४॥**

**अन्वयः** - हे नृप ! क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः अतः असाधु साधु वा क्षन्तुम् अर्हसि हितं मनोहारि च वचः दुर्लभम्।

**भावार्थः** - वनेचरः कथयति - कदापि अनुचरैः चारचक्षुषः राजानः नैव वञ्चनीयाः, तस्मात् इहाहं यत्साधु असाधु वा कथयामि तद्भवान् सोढुमर्हति, यतोहि हितकरं मनोहरञ्च वचनं दुर्लभम्।

४. **स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किम्प्रभुः।**
**सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥५॥**

**अन्वयः** - यः अधिपं साधु न शास्ति स किंसखा यः हितात् न संश्रृणुते सः किम्प्रभुः हि नृपेषु अमात्येषु च अनुकूलेषु सर्वसम्पदः सदा रतिं कुर्वते।

**भावार्थः** - यः स्वामिनं साधु न उपदिशति सः कुत्सितः सखा, यश्च स्वामी हितैषीणः सेवकात् सम्यक् न श्रृणोति सः कुत्सितः स्वामी वर्तते, यतो हि अमात्यनृपयोः परस्परमनुकूलयोः सतोः सर्वाः सम्पत्तयः सदा अनुकूलाः भवन्ति। अतः अहं यद्वदामि तद्भवान् शान्तचित्तेन श्रृणोतु।

५. **विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।**
**दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः॥७॥**

**अन्वयः** - सुयोधनः नृपासनस्थः अपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते।

**भावार्थः** - दुर्योधनः साम्प्रतं द्यूतच्छलेन जितां धरां न्यायेन जेतुं कामयते। स एवं भवतः भयकारणात् करोति, यतो हि सः चिन्तयति भवान् कदापि आगत्य तस्य राज्यं जेतुं प्रभवति।

६. **तथाऽपि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।**

**समुन्नयन्भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः॥८॥**

**अन्वयः** - तथापि जिह्मः सः भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तनोति भूतिं समुन्नयन् महात्मभिः समं विरोधः अपि अनार्यसङ्गमात् वरम्।

**भावार्थः** - सः सुयोधनः भवन्तं जेतुम् इच्छया आत्मनो गुणवत्तां प्रकटयति, यतो हि वैभवं सम्पादयन् सज्जनैस्सह विरोधोऽपि दुष्टसंसर्गात् प्रियो भवति।

७. **स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः।**

**मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम्॥२२॥**

**अन्वयः** - इद्धशासनः स नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः मखेषु हव्येन हिरण्यरेतसं धिनोति।

**भावार्थः** - अप्रतिहताज्ञः दुर्योधनः नवयौवनोद्धतं दुःशासनं यौवराज्ये नियोज्य पुरोहिताज्ञानुसारं अनलसः सन् यज्ञेषु हविषा वह्निं जुहोति।

८. **व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।**

**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः॥३०॥**

**अन्वयः** - ते मूढधियः पराभवं व्रजन्ति ये मायाविषु मायिनः न भवन्ति शठाः तथाविधान् असंवृताङ्गान् निशिता इषवः इव प्रविश्य घ्नन्ति हि।

**भावार्थः** - ये जनाः शठे शाठ्यं समाचरेत् इति नीतिं न जानन्ति ते शठैः निहिताः तिष्ठन्ति, वस्तुतः कुटिलेषु आर्जवं न नीतिः।

९. **गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।**

**परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥३१॥**

**अन्वयः** - अनुरक्तसाधनः कुलाभिमानी त्वत् अन्यः कः इव नराधिपः गुणानुरक्तां कुलजां मनोरमां श्रियम् आत्मवधूम् इव परैः अपहारयेत्।

**भावार्थः** - द्रौपदी कथयति यत्, जगत्यस्मिन् त्वदन्यः न कोऽपि विद्यते, यो हि विविध-विशिष्टगुणयुक्तां श्रियं(लक्ष्मीं) स्वप्रियतमामिव वधूं शत्रुभिः अपहारयेत्।

१०. **भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव ! वर्त्मनि ।**

**कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः॥३२॥**

**अन्वयः** - नरदेव ! एतर्हि मनस्विगर्हिते वर्त्मनि विवर्तमानं भवन्तम् उदीरितः मन्युः शुष्कं शमीतरुम् उच्छिखः अग्निरिव कथं न ज्वलयति।

**भावार्थः** - यथा शुष्कं शमीतरुम् अग्निः ऊर्ध्वशिखः सन् ज्वलयति तथैव मनस्विगर्हिते वर्तमानं भवन्तं कथं न ज्वलयति। इदन्तु महदाश्चर्यम्।

११. **विहाय शान्तिं नृप ! धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ।**
**व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥४२॥**

**अन्वयः** - नृप ! शान्तिं विहाय तत् धाम विद्विषां वधाय पुनः सन्धेहि प्रसीद, निःस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति भूभृतः तु न।

**भावार्थः** - द्रौपदी कथयति - हे नृप! यथा निष्कामा मुनयः शत्रून् विजित्य शान्त्या सिद्धिं प्राप्नुवन्ति, तथा भवान् अपि शान्तिं त्यक्त्वा तेजसा शत्रूणां वधार्थं सन्नद्धो भवतु।

## शब्दार्थाः

| | |
|---|---|
| कृतप्रणामस्य | कृतः प्रणामः येन |
| सपत्नेन | शत्रुणा |
| महीभुजे | नृपाय |
| निवेदयिष्यतः | निवेदयन् |
| न विव्यथे | व्यथितं न अभवत् |
| हितैषिणः | हितेच्छवः |
| मृषा | अनृतम् |
| द्विषाम् | शत्रूणाम् |
| विघाताय | विनाशाय |
| रहसि | एकान्ते |
| अनुजीविभिः | सेवकैः |
| चारचक्षुषः | चाराः एव चक्षुंसी येषां ते |
| जिह्मः | कुटिलः |

| | |
|---|---|
| भवज्जिगीषया | भवन्तं जेतुमिच्छया |
| मनस्विगर्हिते | मनस्विजनैः निन्दिते सति |

## अभ्यासः

### १. अधोलिखितान् प्रश्नान् पूर्णवाक्येन समाधत्त -

(क) भारवेः महाकाव्यस्य नाम किम् ?

(ख) 'किरातार्जुनीयम्' इति पदस्य व्युत्पत्तिं लिखत।

(ग) किरातार्जुनीयमहाकाव्ये मुख्यो रसः कः ?

(घ) किरातार्जुनीयमहाकाव्ये कति सर्गाः सन्ति ?

(ङ) चारचक्षुषः के ?

(च) कीदृग् वचः दुर्लभम् ?

### २. अधः विद्यमानानां शब्दानां समासनिर्देशपूर्वकं विग्रहवाक्यं लिखत -

| | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| (क) कृतप्रणामस्य | .................. | .................. |
| (क) महीभुजे | .................. | .................. |
| (क) चारचक्षुषः | .................. | .................. |
| (क) किंसखा | .................. | .................. |
| (क) सर्वसम्पदः | .................. | .................. |
| (क) निसर्गदुर्बोधम् | .................. | .................. |
| (क) गुणसम्पदा | .................. | .................. |
| (क) भवज्जिगीषया | .................. | .................. |

### ३. रिक्तस्थानानि पूरयत -

(क) अतोऽर्हसि ................................................ वचः।

(ख) स किंसखा .......................................... किम्प्रभुः।

(ग) ............................................... गुणसम्पदा यशः।

(घ) व्रजन्ति .............................................. इवेषवः॥

(ङ) विहाय शान्तिं ................................................ भूभृतः॥

४. **अधोलिखितानां सूक्तीनां भावार्थं संस्कृतभाषया/मातृभाषया/आङ्गलभाषया/ वा लिखत -**

(क) हितं मनोहारि च दुलर्भं वचः।

(ख) सं किं सखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किं प्रभुः।

(ग) समुन्नयन् भूतिमनार्यसंगमाद्, वरं विरोधोऽपि समं महात्मभिः।

(घ) न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।

(ङ) शमेन सिद्धिं मुनयो न भूभृतः।

५. **अधोलिखितानां शब्दानां पर्यायपदं लिखत -**

विधाता, मेदिनी, वसुः, कृषीबलः, अनारतम्, सुतम्।

६. **कोष्ठकात् चित्वा शून्यस्थानं पूरयत।**

| मायाविषु, कुलजाम्, तस्य, मूढधियः, सुयोधनः, समाययौ, मृषा |
|---|

(क) न विव्यथे ........... मनो न हि प्रियं प्रवक्तुमिच्छन्ति ........ हितैषिणः।

(ख) स वर्णिलिङ्गी विदितः ............. युधिष्ठिरं द्वैतवने वनेचरः।

(ग) गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी .............. नराधिपः।

(घ) व्रजन्ति ते ............ पराभवं भवन्ति ............ ये न मायिनः।

(ङ) दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं ..............।

७. **अधोलिखितानि वाक्यानि परिशोध्य लिखत -**

**यथा** - विषङ्कमानो भवतो परामम् .......।

विशङ्कमानो भवतः पराभवम्........।

(क) सज्जनैर्सह विरोधापि दुश्टसंसर्गाद् प्रियो भवदि।

(ख) ब्रजन्ति ते मुढधीयः पराभवम्।

(ग) कदापि अनुचरैर्चारुचक्षुशः राजाणः नैव वञ्चनीयः।

(घ) दुरोदरश्छद्मजितां समिहते नयेण जेतं जगतिं सूयोधनः।

(ङ) धामः तत्पूनः प्रसिद सम्धेहि बधाय विद्विशाम्।

८. **प्रकृति-प्रत्ययविभागं कुरुत -**

| | | प्रकृतयः | प्रत्ययाः |
|---|---|---|---|
| (क) | विशङ्कमानः | .................. | .................. |
| (ख) | वेदितुम् | .................. | .................. |
| (ग) | भवतु | .................. | .................. |
| (घ) | अयुङ्क्त | .................. | .................. |
| (ङ) | विहाय | .................. | .................. |
| (च) | ज्ञातुम् | .................. | .................. |
| (छ) | विदितः | .................. | .................. |

९. **प्रयोगपरिवर्तनं कुरुत -**

(क) भवान् अपि शान्तिं त्यक्त्वा तेजसा शत्रूणां वधार्थं सन्नद्धो भवतु।

(ख) यज्ञेषु हविषा वह्निं जुहोति।

(ग) भवान् शान्तचित्तेन शृणोतु।

(घ) हितैषिणः जनाः सर्वदा सत्यमेव वदन्ति।

(ङ) हितं मनोहारि च दुर्लभं वचः।

१०. **किरातार्जुनीयमहाकाव्यस्य कवेश्च संस्कृतगिरा परिचयं लिखत।**

११. **क्रियासु युक्तैर्नृपचारचक्षुषो ............ । इति श्लोकस्य भावार्थं लिखत।**

## योग्यता-विस्तारः

किरातार्जुनीयमहाकाव्ये प्रथमसर्गे भारविणा वंशस्थवृत्तस्य प्रयोगः कृतः। तद्यथा - प्रथमसर्गस्य प्रथमश्लोकतः चतुश्चत्वारिंशं श्लोकं यावत् वंशस्थच्छन्दसा रचितमस्ति।

**वंशस्थलक्षणम् –**

'जतौ तु वंशस्थमुदीरितं जरौ।'

जगण तगण जगण रगण

।ऽ। ऽऽ। ।ऽ। ऽ।ऽ

श्रियः कुरूणामधिपस्य पालनीं

प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ,
युधिष्ठिरं द्वैतवने वनेचरः॥

**पुष्पिताग्रच्छन्दसः लक्षणम् -**

"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।"

नगण नगण रगण यगण

।।। ।।। ऽ।ऽ ।ऽऽ

न समयपरिरक्षणं क्षमं ते,
निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि॥

**मालिनीछन्दसः लक्षणम् -**

"ननमयययुतेयं मालिनी भोगिलोकैः।"

नगण नगण मगण यगण यगण

।।। ।।। ऽऽऽ ।ऽऽ ।ऽऽ

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं,
शिथिलवसुमगाधे मग्नमापत्पयोधौ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ,
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥

सूक्तयः-

१ गुणानुरोधेन विना न सत्क्रिया।
२ अहो दुरन्ता बलवद् विरोधिता।
३ प्रवृत्तिसाराः खलु मादृशां गिरः।
४ व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
५ अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः।
६ विचित्ररूपाः खलुचित्तवृत्तयः।

७ परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम्।

८ निराश्रया हन्त हता मनस्विता।

९ अरिषु हि विजयार्थिनः क्षितीसा विदधति सोपधि सन्धिदूषणानि।

१० सहसा विदधीत न क्रियाम्।

# सप्तमः पाठः

# सुभाषितम्

**विद्या ददाति विनयं विनयाद्याति पात्रताम् ।**
**पात्रत्वाद् धनमाप्नोति धनाद्धर्मं ततः सुखम्॥**

**भावार्थः -** विद्या अस्मभ्यं विनयं ददाति, विनयेन वयं योग्यतां प्राप्नुमः योग्यतया वयं धनं प्राप्नुमः। धनात् धर्मं प्राप्नुमः (धनेन धर्माचरणसामर्थ्यं भवति) धर्मात् सुखं प्राप्नुमः।

**हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा**
**ऽप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम्।**
**कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं**
**येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते॥**

**भावार्थः -** हे राजन् !। यत् चोरेण चौर्यं कर्तुं न शक्यते सर्वदा शुभं वर्धयति, अर्थिभ्यः दीयमाना सदापि उन्नतिमेव प्राप्नोति, प्रलयकालेष्वपि नाशत्वं च न याति तादृशी विद्या नाम गुप्तं धनं येषां पण्डितानां समीपे विद्यते तेषां विषये गर्वं त्यजन्तु। विद्वद्भिः सह कः पुरुषः साम्यार्थं प्रयतते।

**अधिगतपरमार्थान् पण्डितान् माऽवमंस्था**
**स्तृणमिव लघुलक्ष्मीर्नैव तान् संरुणद्धि।**
**अभिनवमदलेखाश्यामगण्डस्थलानां**
**न भवति बिसतन्तुवरिणं वारणानाम् ॥**

**भावार्थः -** हे राजन् !। सूक्ष्मेण मृणालसूत्रेण मदमत्तानां हस्तिनां बन्धनं यथा न सम्भवति तथा लक्ष्मीं तुच्छतृणतुल्यां मन्यमानाः पण्डिताः न कदापि तया लक्ष्म्या नृपाः वशीकर्तुं शक्या इति।

**केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः**
**न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥**

**भावार्थः -** बहुभूषणानि, हाराः, स्नानम्, निमज्जनम्, विलेपनादिद्रव्याणि, केशाः एते सर्वेऽपि पुरुषं नालङ्कुर्वन्ति। केवलम् एका शुद्धा संस्कृता वागेव पुरुषम् अलङ्करोति। अतः तामेव सम्पादयितुं मनुष्यैः प्रयत्नो विधेयः। केयूरादीनि भूषणानि सर्वाण्यपि बाह्यसौन्दर्यवर्धकान्येव। अन्तस्सौन्दर्यकारकं केवलं वाग्भूषणमेव भवति।

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च॥**

**भावार्थः -** जलस्य बिन्दूनां क्रमशः पतनेन यथा घटः पूर्णो भवति तथैव स्वल्पेन अभ्यासेन आचरणेन सङ्ग्रहणेन च वयं विद्यां धर्मं धनं च सम्पादयितुं शक्नुमः।

**प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्ननिहता विरमन्ति मध्याः।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति॥**

**भावार्थः -** उत्तममध्यमाधमभेदेन यथा पुरुषाः त्रिविधाः भवन्ति। तथा तेषां कार्याणां स्वरूपाण्यपि त्रिविधानि विद्यन्ते। उत्तमः पुरुषः मनस्वी विघ्नान् अविगणय्य कार्यपूर्णतां भजते। मध्यमः कार्यं प्रारभ्यापि तस्य दुष्करतामनुभवन् मध्ये एव कार्यं त्यजति, कार्यात्पराङ्ऽमुखो भवति। अधमः विघ्नसम्भवभीत्या कार्यारम्भमेव न करोति।

**दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन्।**
**मणिना भूषितः सर्पः किमसौ न भयङ्करः॥**

**भावार्थः -** सर्पस्य शिरसि मूल्यवत् रत्नं भवति। तथापि प्राणान्तकं विषं भवतीति हेतोः सर्पः भयङ्करः। अतः वयं सर्पाद् दूरे भवामः। एवमेव महत्त्वपूर्णविद्या कस्यचित् समीपे भवति चेदपि प्राणान्तकाः नीचाः गुणाः भवन्ति इति हेतोः सः दुर्जनः भयङ्करः। अतः तस्मादपि अस्माभिर्दूरे भाव्यम्।

**आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमुपैति पश्चात्।**
**दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलु सज्जनानाम्॥**

**भावार्थः -** प्रातःकालिकी छाया सुदीर्घा भवति। मध्याह्नपर्यन्तं क्रमशः ह्रस्वा भवति। मध्याह्नकालिकी छाया ह्रस्वा भवति। सायङ्कालपर्यन्तं क्रमशः दीर्घा भवति। एवमेव दुर्जनयोः मध्ये मैत्री प्रारम्भसमये गहना भवति। काले गच्छति सति शिथिला भवति। सज्जनयोः मध्ये मैत्री चेदारम्भे साधारणा भवति। काले गच्छति सति विशिष्टा भवति।

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीस्समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥**

**भावार्थः -** नीतिविदः निन्दां कुर्वन्तु अथवा स्तुवन्तु, लक्ष्मीः आगच्छतु वा स्वेच्छानुसारं गच्छतु, मृत्युः युगान्तरे अद्यैव वा समाविशतु तथापि धीराः पुरुषाः न्याय्यात् मार्गात् एकं चरणमपि न च्यवन्ते।

**भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्भूरिविलम्बितो धनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥**

**भावार्थः -** यथा फलवन्तः वृक्षाः फलभारेण नम्रा भवन्ति, जलपूर्णा मेघा अपि पृथिव्यां वर्षन्ति। तथैव सज्जनाः समृद्धिशालिनः सन्तोऽपि नम्राः सहृदयाश्च भवन्ति, यतो लोकोपकार एव तेषां स्वभावसिद्धो धर्मः।

## शब्दार्थाः

| | |
|---|---|
| हर्तुः | चौरस्य |
| शम् | कल्याणम् |
| पुष्णाति | वर्धते |
| अन्तर्धनम् | गुप्तधनम् |
| केयूराणि | आभूषणानि |
| चन्द्रोज्ज्वलाः | चन्द्रः इव उज्ज्वलः |
| खलु | निश्चयः |
| परिहर्तव्यः | त्यक्तव्यः |
| विद्ययालङ्कृतोऽपि | विद्यया भूषितः अपि |
| फलोद्गमैः | फले आगते सति |

# अभ्यासः

१. **वस्तुनिष्ठाः प्रश्नाः -**

(क) विद्या नाम कीदृशं धनम् अस्ति?

(अ) गुप्तम् (आ) दृष्टम्

(इ) देयम् (ई) भोज्यम्

(ख) पुरुषं का अलङ्करोति?

(अ) हाराः (आ) केशाः

(इ) वहुभूषणानि (ई) शुद्धा संस्कृता वाक्

(ख) विद्या किं ददाति ?

(अ) फलम् (आ) पुष्पम्

(इ) धनम् (ई) विनयम्

(ग) कीदृशाः वृक्षाः नम्राः भवन्ति ?

(अ) फलवन्तः (आ) पुष्पवन्तः

(इ) पत्रवन्तः (ई) शाखावन्तः

(घ) कः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ?

(अ) सज्जनः (आ) दुर्जनः

(इ) भद्रजनः (ई) कोऽपि न

(ङ) छायेव मैत्री भवति।

(अ) दुर्जनानाम् (आ) सज्जनानाम्

(इ) दुष्टानाम् (ई) कोऽपि न

(च) केन पूर्यते घटः?

(अ) जलबिन्दुनिपातेन (आ) विद्यया

(इ) सूर्यस्य तेजसा (ई) वायुना

## २. रिक्तस्थानानि पूरयत -

(क) केयूराणि न भूषयन्ति ........................ सततं वाग्भूषणं भूषणम्।

(ख) प्रारभ्यते न खलु ............................. जनाः न परित्यजन्ति।

(ग) दुर्जनः परिहर्तव्यो ............................................ किमसौ न भयङ्करः।

(घ) आरम्भगुर्वी ....................................... खलु सज्जनानाम्।

(ङ) निन्दन्तु नीतिनिपुणाः ...................................... पदं न धीराः।

## ३. यथायोग्यं योजयत -

| | |
|---|---|
| (क) विद्या ददाति विनयं | छायेव मैत्री खलु सज्जनानाम् |
| (ख) दिनस्य पूर्वार्धपरार्धभिन्ना | सततं वाग्भूषणं भूषणम् |
| (ग) क्षीयन्ते खलु भूषणानि | विनयाद्याति पात्रताम् |
| (घ) दुर्जनः परिहर्तव्यो | विद्ययालङ्कृतोऽपि सन् |
| (ङ) भवन्ति नम्रास्तरवः फलोद्गमैः | नवाम्बुभिर्भूमिविलम्बिनो घनाः |

## ४. अधोनिर्दिष्टान् प्रश्नान् एकपदेन समाधत्त -

(क) केन मदमत्तानां हस्तिनां बन्धनं न सम्भवति ?

(ख) सततं भूषणं किम् ?

(ग) नीचैः किमर्थं कार्यं न प्रारभ्यते ?

(घ) कीदृशाः तरवः नम्राः भवन्ति ?

(ङ) कः परिहर्तव्यः ?

## ५. पूर्णवाक्येन उत्तरत -

(क) के न्याय्यपथात् न प्रविचलन्ति ?

(ख) सन्मित्रेण जायमानाः लाभाः के ?

(ग) पुरुषं केयूरादिकं किमर्थं न भूषयति ?

(घ) वृक्षैः किं प्राप्तुं शक्यते ?

(ङ) विनयात् किं याति ?

## ६. प्रकृति-प्रत्ययं विभाजयत -

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | यथेष्टम् | .................. | .................. |
| (ख) | विलेपनम् | .................. | .................. |
| (ग) | परिहर्तव्यः | .................. | .................. |
| (घ) | संस्कृता | .................. | .................. |
| (ङ) | संरुणद्धि | .................. | .................. |
| (च) | हर्ता | .................. | .................. |
| (छ) | मन्यमानाः | .................. | .................. |

## ७. उचितपदं चित्वा शून्यस्थानानि पूरयत -

(क) नीतिविदः........... कुर्वन्तु अथवा स्तुवन्तु। (निन्दां/प्रशंसां/नमस्कारं)

(ख) केयूरादीनि भूषणानि सर्वाण्यपि ..........वर्धकानि। (बाह्यसौन्दर्य/अन्तस्सौन्दर्य)

(ग) जलबिन्दुनिपातेन क्रमशः पूर्यते ..........। (कूपः/तडागः/घटः)

(घ) दुर्जनः परिहर्तव्यो ................. अलङ्कृतोऽपि सन्। (अहङ्कारेण/विद्यया/विनयेन)

(ङ) धर्मात् ............ प्राप्नुमः। (सुखं/दुःखं/हर्षं)

## ८. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -

| | | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | प्रारभ्य | .........+.......... | .................. |
| (ख) | अद्यैव | .........+........ | .................. |
| (ग) | फलोद्गमैः | .........+.......... | .................. |
| (घ) | वाण्येका | .........+.......... | .................. |
| (ङ) | वाग्भूषणम् | .........+.......... | .................. |
| (च) | नम्रास्तरवः | .........+......... | .................. |
| (छ) | सज्जनानाम् | .........+.......... | .................. |

९. **अधोलिखितानां समस्तपदानां विग्रहवाक्यसहितं समासनाम लिखत -**

| | | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | अधिगतपरमार्थाः | .................. | .................. |
| (ख) | वाग्भूषणम् | .................. | .................. |
| (ग) | विघ्नभयम् | .................. | .................. |
| (घ) | फलोद्गमाः | .................. | .................. |
| (ङ) | सर्वविद्या | .................. | .................. |
| (च) | उत्तमजनः | .................. | .................. |

१०. **अधोलिखितपदानां मूलशब्दं विभक्तिं वचनं लिङ्गञ्च लिखत -**

| पदानि | | मूलशब्दः | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| (क) | धीराः | ......... | ......... | ........ | ........ |
| (ख) | उद्गमैः | ....... | ......... | ........ | ........ |
| (ग) | बुद्धिम् | ........ | ......... | ......... | ........ |
| (घ) | युगान्तरे | ......... | ......... | ......... | ......... |
| (ङ) | विनयात् | ......... | .......... | .......... | .......... |

११. **प्रयोगपरिवर्तनं कुरुत -**

(क) धीराः पुरुषाः न्यायोचितात् मार्गात् एकं चरणमपि न च्यवन्ते।

(ख) वयं विद्यां धर्मं धनं च सम्पादयितुं शक्नुमः।

(ग) उत्तमः पुरुषः मनस्वी विद्वान् अविगणय्य कार्यपूर्णतां भजते।

(घ) मनुष्यैः प्रयत्नः विधेयः।

(ङ) विद्या अस्मभ्यं विनयं ददाति।

## योग्यता-विस्तारः

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशस्सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता

विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्कचित्॥

कश्चिद् विजातिप्रवरो वेदाध्यायी तपोधनः।
तपस्वी धर्मशीलश्च कौशिको नाम भारत॥

ब्राह्मणं क्रोधसंतप्तं ज्वलन्तमिव तेजसा।
दृष्ट्वा साध्वी मनुष्येन्द्रः सान्त्वपूर्वं वचोऽब्रवीत्॥

रत्नैर्महार्हैस्तुतुषुर्न देवाः न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः॥

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम्।
आपत्सु च महाशैलशिलासङ्घातकर्कशम्॥

# अष्टमः पाठः

## शुकनासोपदेशसारः

कवेः कर्म इति काव्यम्, काव्यं नाम रसयुक्तं वाक्यम् इति। उक्तमपि विश्वनाथेन 'वाक्यं रसात्मकं काव्यम्। संस्कृतसाहित्ये काव्यस्य द्वौ भेदौ दृश्येते – दृश्यं श्रव्यं चेति। दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधामतम्। तयोः श्रव्यकाव्यं श्रवणयोग्यं महाकाव्यादिकम्। दृश्यकाव्यमभिनययोग्यं नाटकादिकम्। श्रव्यकाव्यं पुनः गद्य-पद्यमिश्रभेदेन त्रिप्रकारकं भवति। तत्र **छन्दोबद्धमयं पद्यम्, वृत्तबन्धोज्झितं च गद्यम्। 'गद्यं कवीनां निकषं वदन्ति'** इति गद्यकाव्यस्यापि 'आख्यायिका', 'कथा' इति भेदद्वयम्।

गद्यनिर्माणपरम्परायां बाणभट्ट एव प्रधानः इति नास्ति संशयः। तद्विरचिता **कादम्बरी** गद्यकाव्येषु महत्वपूर्णं स्थानं बिभर्ति। महाकविः बाणभट्टः कान्यकुब्जेश्वरस्य हर्षवर्धनस्य समकालिकः आसीत्। स तस्य सभायाः सभापण्डित आसीत्। हर्षवर्धनस्य राज्यकालः ६०६ - ६४८ पर्यन्तम् आसीत्। महाकवेः वर्णनसौन्दर्यम् अनुपमम्। अत्र सर्वत्रैव अलङ्काराणां सहृदयानां मनसि परमोल्लासं जनयति। कादम्बरी नाम श्रृङ्गाररसरूपी मदिरा। तथोक्तं बाणभट्टेन - "कादम्बरीरसभरेण समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम्" इति। एतस्य ग्रन्थस्य पूर्वभागं निर्माय कविः बाणभट्टः दिवङ्गतः। तदा तत्पुत्रः भूषणभट्टः अस्य उत्तरभागं रचयामास। कादम्बर्याः कथाभागस्य एकः अंशः **शुकनासोपदेशः** अत्र प्रतिपाद्यमानो विषयः।

एवं समतिक्रामत्सु दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुप-करण-सम्भारसङ्ग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकं च तं कदाचिद् दर्शनार्थमागतमा-रूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनासः सविस्तरमुवाच

तात! चन्द्रापीड! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवातिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। अप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति, इत्यतः विस्तरेणाभिधीयसे।

गर्भेश्वरत्वमभिनवयौवनत्वम्, अप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन–निर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यासङ्गो विषयेषु।

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। राजवचनमनुगच्छति जनो भयात्। उपदिश्यमानमपि ते न श्रृण्वन्ति। श्रृण्वन्तोऽपि च गजनिमीलितेन अवधीरयन्तः खेदयन्ति शब्दादयिनो गुरून् । अहङ्कार-दाहज्वर-मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलीकाभिमानोन्मादकारीणि धनानि, राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मीः ।

आलोकयतु तावत् कल्याणाभिनिवेशीं लक्ष्मीमेव प्रथमम्। न ह्येवं विधमपरिचितमिह जगति। न किञ्चिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। परिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमवबुध्यते। पश्यति एवं नश्यति। सरस्वतीपरिगृहीतं नालिङ्गति जनम्। गुणवन्तं न स्पृशति। सुजनं न पश्यति। शूरं कण्टकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। विनीतं नोपसर्पति। तृष्णां संवर्धयति। लघिमानमापादयति। एवं विधायापि चानया कथमपि दैववशेन परिगृहीता विक्लवाः भवन्ति राजानः, सर्वाविनयाधिष्ठानतां च गच्छन्ति।

अपरे तु स्वार्थनिष्पादनपरैः दोषानपि गुणपक्षमध्यारोपयद्भिः प्रतारणकुशलैर्धूर्तैः प्रतार्यमाणा वित्तमदमत्तचित्ता सर्वजनोपहास्यतामुपयान्ति। न मानयन्ति मान्यान्, जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धोपदेशम्। कुप्यन्ति हितवादिने सर्वथा तमभिनन्दन्ति, तं संवर्धयन्ति, तस्य वचनं श्रृण्वन्ति, तं बहु मन्यन्ते योऽहर्निशम् अनवरतं विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति।

तदतिकुटिलचेष्टादारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि च यौवने कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपलभ्यसे सुहृद्भिः न शोच्यते विद्वद्भिः। यथा च न प्रकाश्यते विटैः, न प्रहस्यसे कुशलैः नास्वाद्यसे भुजङ्गैः नावलुप्यसे सेवकवृकैः, न वञ्चसे धूर्तैः, न प्रलोभ्यसे वनिताभिः, न विडम्ब्यसे लक्ष्म्या, न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विषयैः, नावकृष्यसे रागेण, नापह्रियसे सुखेन।

इदमेव च पुनः पुनरभिधीयसे विद्वांसमपि, सचेतसमपि, महासत्त्वमपि, अभिजातमपि, धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरित्येतावदभिधायोपशशाम।

चन्द्रापीडस्ताभिरुपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, उद्भासित इव, प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

## शब्दार्थाः

| | |
|---|---|
| चिकीर्षुः | कर्तुमिच्छुः |
| निसर्गतः | स्वभावतः |
| अपरिणामोपशमः | वृद्धावस्थायामपि अशान्तः |
| विदितवेदितव्यस्य | ज्ञातं ज्ञेयं येन सः, तस्य |
| गर्भेश्वरत्वम् | जन्मनः प्राप्तं प्रभुत्वम् |
| अपगतमले | अपगतं मलं यस्मात्, तस्मिन् |
| अवधीरयन्तः | तिरस्कुर्वन्तः |
| कल्याणाभिनिवेशी | कल्याणेच्छुकः |
| वैदग्ध्यम् | पाण्डित्यम् |
| लघिमानमापादयति | निम्नतां प्रापयति |
| विक्लवाः | विह्वलाः |
| प्रतार्यमाणाः | वञ्चिताः |
| जरावैक्लव्यप्रलपितम् | वृद्धावस्थायां विकलतां प्राप्य निरर्थकमुक्तम् |
| प्रयतेथाः | प्रयत्नं कुर्याः |
| खलीकरोति | अखलं खलं करोति इति |
| उपशशाम | अशाम्यत |

# अभ्यासः

## १. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -

(क) किं नाम काव्यम् ?

(ख) काव्यं कतिविधम् ?

(ग) पद्यं किम् ?

(घ) वृत्तबन्धोज्झितं किम् ?

(ङ) कवीनां निकषं कं वदन्ति ?

(च) गद्यकाव्यं कतिविधम् ?

## २. समुचितं मेलनं कुरुत -

| | |
|---|---|
| (क) कादम्बरी | चन्द्रापीडम् |
| (ख) हर्षचरितम् | महाकाव्यम् |
| (ग) कुमारसम्भवम् | कथा |
| (घ) अभिज्ञानशाकुन्तलम् | आख्यायिका |
| (ङ) शुकनासः उपदिष्टवान् | नाटकम् |

## ३. पूर्णवाक्येन प्रश्नान् उत्तरत -

(क) गर्भेश्वरत्वम् इत्यस्य कोऽर्थः ?

(ख) कादम्बरीहर्षचरितयोः रचयिता कः ?

(ग) कीदृशः लक्ष्मीमदः ?

(घ) शुकनासः कम् उपदिशति ?

(ङ) किं कारणम् अनर्थपरम्परायाः ?

## ४. एकपदेन प्रश्नान् समाधत्त -

(क) कीदृशे मनसि उपदेशगुणाः प्रविशन्ति ?

(ख) लब्धापि दुःखेन का परिपाल्यते ?

(ग) लक्ष्म्या परिगृहीताः राजानः कीदृशाः भवन्ति ?

(घ) राजानः वृद्धोपदेशं किमिति पश्यन्ति ?

(ङ) चन्द्रापीडः उपदेशानन्तरं कथं भूत्वा स्वभवनमाजगाम ?

## ५. विशेषणानि विशेष्यैः सह योजयत -

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (क) | दारुणो | दिवसेषु |
| (ख) | अधीतशास्त्रस्य | विद्वांसम् |
| (ग) | समतिक्रामत्सु | ते |
| (घ) | सचेतसम् | यौवनप्रभवम् |
| (ङ) | अतिमलिनम् | लक्ष्मीमदः |
| (च) | गहनं तमो | दोषजातम् |

## ६. अधोलिखितानां पदानां सन्धि-विच्छेदपूर्वकं सन्धिनाम लिखत -

| | | सन्धिविच्छेदः | सन्धिनामः |
|---|---|---|---|
| (क) | विशङ्कमानः | .........+.......... | ................... |
| (क) | नोपसर्पति | .........+......... | ................... |
| (ख) | महतीयम् | ........ +.......... | ................... |
| (ग) | नाभिजनम् | ......... +.......... | ................... |
| (घ) | ह्येवम् | ........ +.......... | ................... |
| (ङ) | गुरूपदेशः | ........ +.......... | ................... |
| (च) | गर्भेश्वरत्वम् | ........ +.......... | ................... |
| (छ) | एवातिगहनम् | ........ +.......... | ................... |
| (ज) | खल्वनर्थम् | ........ +.......... | ................... |

## ७. प्रकृति-प्रत्ययविभागं कुरुत –

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | उपशशाम | ..................... | .......................... |
| (ख) | चिकीर्षुः | ..................... | .......................... |
| (ग) | जगाम | ..................... | .......................... |
| (घ) | उपदेष्टव्यम् | ..................... | .......................... |

(ङ) उन्मीलितः .................... .........................

(च) अपह्रियसे .................... .........................

## ८. अधोलिखितसमस्तपदानां विग्रहवाक्यं लिखत -

(क) उपकरणसम्भारसङ्ग्रहार्थम् ...........................................

(ख) अपरिणामोपशमः ...........................................

(ग) विदितवेदितव्यस्य ...........................................

(घ) अपगतमले ...........................................

(ङ) कल्याणाभिनिवेशी ...........................................

(च) अमानुषशक्तित्वम् ...........................................

(छ) अत्यासङ्गः ...........................................

(ज) अहर्निशम् ...........................................

## ९. रिक्तस्थानानि पूरयत।

(क) ................................ परिचयं न रक्षति।

(ख) दातारं .............................................................।

(ग) ........................................... नालिङ्गति जनम्।

(घ) भवादृशा एव .............................................................।

(ङ) ........................................... सुखेनोपदेशगुणाः।

(च) अवधीरयन्तः खेदयन्ति .............................................................।

(छ) इदमेव च पुनः पुनरभिधीयसे .................................... शशाम।

## १०. प्रयोगपरिवर्तनं कुरुत -

(क) गद्यकाव्येषु कादम्बरी महत्त्वपूर्णं स्थानं बिभर्त्ति।

(ख) भूषणभट्टः अस्य उत्तरभागम् अरचयत्।

(ग) दातारं दुःस्वप्नमिव न स्मरति।

(घ) चन्द्रापीडः प्रीतहृदयो मुहूर्त्तं स्थित्वा स्वभवनमाजगाम।

(ङ) गुरूपदेशः अतिमलिनमपि दोषजातं हरति।

११. सप्रसङ्गं मातृभाषया/संस्कृतभाषया/आंग्लभाषया लिखत -

(क) तात! चन्द्रापीड ! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युदेष्टव्यमस्ति। केवलं च निसर्गत एवातिगहनं तमो यौवनप्रभवम् ।

(ख) अप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति, इत्यतः विस्तरेणाभिधीयसे ।

(ग) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन-निर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यसङ्गो विषयेषु।

## योग्यता-विस्तारः

पञ्चतन्त्रेऽपि क्वचिद् ईदृश एव हृदुल्लासक उपदेशो लभ्यते। यौवनादिकारणैः सम्भावमानमनर्थं पञ्चतन्त्रे एवमुल्लिखितम्-

**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥**

महाभारतस्य उद्योगपर्वणि, विदुरनीत्यामपि एवं निगदितमस्ति -

**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥**
**न क्रोधिनोऽर्थो न नृशंसमित्रं क्रूरस्य न स्त्री सुखिनो न विद्या।**
**न कामिनो ह्रीरलसस्य न श्रीः सर्वं तु न स्यादनवस्थितस्य॥**

**लक्ष्मीविषयकसूक्तयः**

१. अतिगहनं तमो यौवनप्रभवम्।

२. अपरिणामोपशमोदारुणोलक्ष्मीमदः।

३. चन्दनप्रभवो न दहति किमनलः।

४. तरलहृदयमप्रतिबुद्धं च मदयन्ति धनानि।

५. दुरन्तेयमुपभोगतृष्णिका।

६. प्रतिशब्द इव राजवचनमनुगच्छति जनो भयात्।

७. अयमनार्या (लक्ष्मीः) लब्धापि खलु दुःखेन परिपाल्यते।

८. विह्वला हि राजप्रकृतिः।

९. राज्यविषयविकारतन्द्राप्रदा राजलक्ष्मीः।

१०. सरस्वतीपरिगृहीतमीर्ष्यमेव नालिङ्गति लक्ष्मीः।

**लक्ष्मीविषयकविशेषणानि** - इन्द्रियहरिणहारिणी, खड्गमण्डलोत्पलवनविभ्रमभ्रमरी, अपरिचिता, अनार्या, अप्रत्ययबहुला, वसुजननी, तरङ्गबुद्बुदवत्चञ्चला, तमोबहुला, भीमसाहसैकहार्यहृदया, अचिरद्युतिकारिणी, तोयराशिसम्भवा, ईश्वरतामदधाना, अमृतसहोदरा, कटुविपाका, विग्रहवती अपि अप्रत्यक्षदर्शना, पुरुषोत्तमरता, चपला।

# नवमः पाठः

# वैदिकलौकिकछन्दांसि

वैदिकलौकिकवाङ्मये छन्दो विशिष्टं स्थानं भजते। वेदार्थनिर्णये महर्षिभिः आचार्यैश्च अस्य वेदाङ्गत्वं स्वीकृतम्। पाणिनीयशिक्षायां "छन्दः पादौ तु वेदस्य" इत्युक्त्वा छन्दसां महत्त्वं प्रतिपादितमस्ति। निरुक्तकारेण यास्केन उक्तं "चित्ताह्लादकं छन्दः, छन्दयति आह्लादयति इति छन्दः, छन्दांसि छादनात्"(नि.७.३.१२)। वेदाः छन्दोबद्धा वर्तन्ते, तेषाम् उच्चारणाय अर्थावबोधनाय च छन्दोज्ञानं परमावश्यकम्, यो हि छन्दांसि अविदित्वा यज्ञादिकार्याणि साधयति, वेदान् अधीते, अध्यापयति वा सः पापो भवति। वैदिकमन्त्रोच्चारणप्रयोजनपूर्तये छन्दसाम् अध्ययनम् परमावश्यकं विद्यते। उक्तञ्च महर्षिकात्यायनेन - "यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान् भवति, यातयामान्यस्य छन्दांसि भवन्ति। अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयान् भवति अयातयामान्यस्य छन्दांसि भवन्ति। तस्मादेतानि मन्त्रे मन्त्रे विद्यात्"। इति।

ऋग्सामवेदयोः सर्वेऽपि मन्त्राः छन्दोबद्धा वर्तन्ते। यजुर्वेदस्यापि गद्यात्मकाः पद्यात्मकाश्च सर्वे ऋचः छन्दोबद्धा एव विद्यन्ते। एकाक्षरादारभ्य चतुरुत्तरशताक्षराणां (१०४) छन्दसां विधानं विहितम्। प्रमुखानां छन्दसां नामानि तु संहितासु ब्राह्मणग्रन्थेषु च उपलभ्यन्ते। छन्दस्सूत्रस्य प्रारम्भिकेषु चतुर्षु अध्यायेषु वैदिकच्छन्दसां विवरणं लभ्यते।

अस्य शास्त्रस्य छन्दोऽनुशासनं, छन्दोविवृतिः, छन्दोनाम, छन्दोविचितिः इत्यादि-प्राचीननामानि अपि लभ्यन्ते। अस्य छन्दोनाम्नः वेदाङ्गस्य पिङ्गलकृतं 'छन्दःशास्त्रं' प्रतिनिधिभूतो ग्रन्थः। अस्मिन् ग्रन्थे वैदिक-लौकिकानां छन्दसां विवरणं प्राप्यते। तत्र लौकिकवाङ्मये सामान्येन नियतवर्णानां मात्राणां वा नियमबद्धं वाक्यं 'छन्दश्शब्देन' अभिधीयते।

### वैदिकदृष्ट्या छन्दसो भेदाः

वैदिकच्छन्दसां नैके भेदा वर्तन्ते। तेषु गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्करी, अतिशक्करी, अष्टिः, अत्यष्टिः, धृतिः, अतिधृतिः, कृतिः, प्रकृतिः,

आकृतिः, विकृतिः, संस्कृतिः, अभिकृतिः, उत्कृतिश्च त्रिसप्तकेषु विभक्तानि एकविंशतिः छन्दांसि प्राप्यन्ते। मैत्रायणीसंहितायां सप्तैव छन्दांसि इत्युक्तम्। नैके आचार्याः सप्त छन्दांसि एव मन्यन्ते।

अवधेयांशः - ध्यातव्यमस्ति यत्, वैदिकच्छन्दांसि अक्षरप्राधान्यमेव आवहन्ति। अर्थात्, इह अक्षराणामेव गणना विधीयते, न तु मात्राणाम्। अमीषां छन्दसाम् अक्षरविवरणम् अधः प्रदत्तमस्ति।

**गायत्र्यादि छन्दांसि** - १. गायत्री (२४ अक्षराणि)। २. उष्णिक् (२८)। ३. अनुष्टुप् (३२)। ४. बृहती (३६)। पङ्क्तिः (४०)। त्रिष्टुप् (४४)। जगती (४८)।

**द्वितीयसप्तके छन्दांसि** - १. अतिजगती (५२)। २. शक्वरी (५६)। ३. अतिशक्वरी (६०)। ४. अष्टिः (६४)। ५. अत्यष्टिः (६८)। ६. धृतिः (७२)। ७. अतिधृतिः (७६)।

**तृतीयसप्तके छन्दांसि** - १. कृतिः (८०)। २. प्रकृतिः (८४)। ३. आकृतिः (८८)। ४. विकृतिः (९२)। ५. संस्कृतिः (९६)। ६. अभिकृतिः (१००)। ७. उत्कृतिः (१०४)।

**गायत्र्यादिच्छन्दःसप्तकानां विस्तृतविवरणम्**

**गायत्री -**

**गायत्री सा चतुर्विंशत्यक्षरा।**

**अष्टाक्षरास्त्रयः पादाश्चत्वारो वा षडक्षराः॥**

*(ऋक्. प्रा. १६.१६)*

अस्मिन् छन्दसि २४ (चतुर्विंशतिः) अक्षराणि भवन्ति। तत्र आहृत्य त्रयः पादाः भवन्ति। प्रत्येकं पादे अष्टौ अक्षराणि भवन्ति। कदाचित् चत्वारः पादा अपि भवन्ति, तत्र प्रत्येकं पादे षड् अक्षराणि वर्तन्ते।

**उदाहरणम्** - अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।

होतारं रत्नधातमम्॥ (अष्टाक्षरा गायत्री)

इन्द्रः शचीपतिर्बलेन वीळितः।

दुश्च्यवनो वृषा समत्सु सासहि॥ (षडाक्षरा गायत्री)

**उष्णिक्**

**अष्टाविंशत्यक्षरोष्णिक् सा पादैर्वर्तते त्रिभिः।**

**पूर्वावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः॥**

*(ऋक्. प्रा. १६.२९)*

अस्मिन् छन्दसि अष्टाविंशतिः (२८) अक्षराणि भवन्ति। इह त्रयः पादा भवन्ति। तत्र प्रथमपादद्वये अष्टौ अष्टौ अक्षराणि भवन्ति। तृतीये पादे तु द्वादश अक्षराणि भवन्ति।

**उदाहरणम् -** **आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः।**

**भवा नः सुश्रवस्तमः सखा वृधे॥**

**अनुष्टुप्**

**"द्वात्रिंशदक्षरानुष्टुप् चत्वारोऽष्टाक्षराः समाः"।**

*(ऋक्.प्र. १६.३७)*

अनुष्टुब् छन्दसि द्वात्रिंशद् (३२) अक्षराणि भवन्ति। तत्र चत्वारः पादा भवन्ति। प्रत्येकं पादे अष्टौ अक्षराणि भवन्ति।

**उदाहरणम् -**

**सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**

**स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम्॥**

**बृहती**

**चतुष्पदा तु बृहती प्रायः षड्विंशदक्षरा।**

**अष्टाक्षरास्त्रयः पादास्तृतीयो द्वादशाक्षरः॥**

*(ऋक्.प्र. १६.४५)*

बृहतीच्छन्दसि षड्विंशदक्षराणि (३६) भवन्ति। तत्र चत्वारः पादा भवन्ति। तत्र प्रथमे पादत्रये अष्टौ अष्टौ अक्षराणि भवन्ति। तथा चतुर्थे पादे द्वादश अक्षराणि भवन्ति।

**उदाहरणम् -**

**मा चिदन्यद् वि शंसत सखायो मा रिषण्यत।**

**इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत॥**

**पङ्क्तिः**

**"पङ्क्तिरष्टाक्षराः पञ्च"।**

अस्मिन् छन्दसि आहत्य चत्वारिंशद् (४०) अक्षराणि भवन्ति। अत्र पञ्च पादाः सन्ति। प्रत्येकं पादे अष्टौ अक्षराणि भवन्ति।

**उदाहरणम् -**

**इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः।**

**तमिन्महत्स्वाजिषू तेमर्भे हवामहे स वाजेषु प्र नोऽविषत्॥**

**त्रिष्टुप्**

**"चतुश्चत्वारिंशत् त्रिष्टुबक्षराणि चतुष्पदा एकादशाक्षरैः पादैः"॥**

*(ऋक्. प्रा. १६.६४)*

छन्दस्यस्मिन् चतुश्चत्वारिंशदक्षराणि (४४) भवन्ति। इह चत्वारः पादाः सन्ति। तत्र प्रत्येकं पादे एकादशाक्षराणि भवन्ति।

**उदाहरणम् -**

पिबा सोममभि यमुग्र तर्द उर्ध्वं गव्यं महि गृणान इन्द्र।
वि यो धृष्णो वधिषो वज्र हस्त विश्वा वृत्रममित्रिया शवोभिः॥

**जगती**

**"पञ्चाशज्जगती व्यूना चत्वारो द्वादशाक्षरा तदस्या बहुलं वृत्तम्"।**

*(ऋक्. प्रा. १६.१.७४)*

जगतीच्छन्दसि अष्टाचत्वारिंशद् (४८) अक्षराणि स्युः। अत्र पादचतुष्टयं वर्तते। प्रत्येकं पादे द्वादशाक्षराणि भवन्ति।

**उदाहरणम् -**

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्त्रिया निर्णिजं धिरे॥

## लौकिकदृष्ट्या छन्दोभेदः

पिङ्गलः छन्दःसूत्रेषु लौकिकछन्दसः द्विविधत्वं विधत्ते।

१. वर्णच्छन्दः वृत्तं वा २. मात्रिकच्छन्दः जातिः वा।

## वर्णच्छन्दः (वृत्तम्)

"**अक्षरैर्गणना यत्र तद् वृत्तम् इत्युच्यते**" "**वृत्तमक्षरसंख्यातम्**" यच्छन्दः वर्णगणनया परिमीयते तद् वर्णच्छन्दः वृत्तं वा उच्यते। अस्य अपरं नाम वार्णिकछन्दोऽपि, 'वृत्तमञ्जरी' इति ग्रन्थेऽस्मिन् उक्तं **यदक्षरैर्गणना यत्र विद्यते तद् वृत्तमिति** कथ्यते। यथा - इन्द्रवज्रा, वंशस्थः, शिखरिणी इत्यादयः।

## मात्रिकच्छन्दः (जातिः)

**“जातिर्मात्रा कृता भवेत्”** यच्छन्दः मात्रागणनया परिमीयते तद् मात्रिकच्छन्दः। अस्यापरं नाम जातिः इति। एषु छन्दस्सु प्रतिपादं मात्राणां गणना विधीयते, मात्रागणनया च छन्दसः स्वरूपं निश्चीयते। उक्तं हि वृत्तमञ्जर्याम् - **“मात्राभिर्गणना यत्र सा जातिरभिधीयते।** यथा - आर्या।

## पादः -

**“ज्ञेयः पादश्चतुर्थांशः”** छन्दसः चतुर्थो भागः “पादः” इत्युच्यते। प्रत्येकं छन्दः चतुर्षु पादेषु विभक्तं भवति। पादपर्यायवाचित्वेन छन्दःशास्त्रे ‘चरण’पदस्य प्रयोगोऽपि प्राप्यते।

## वर्णः

**“वृणोति वाङ्मयमिति वर्णः”** तदेव क्षरणरहितधर्मत्वात् अक्षरमपि कथ्यते। इह छन्दःशास्त्रे एकस्मिन् काले उच्चार्यमाणः शब्दांश एव अक्षरम् इति निगद्यते।

## मात्रा

वर्णानामुच्चारणकालो ‘मात्रा’ इत्युच्यते। ता मात्रा त्रिविधा ह्रस्व-दीर्घ-प्लुतभेदात्। छन्दःशास्त्रे मात्राणां गणनायै स्वराणां लघुः गुरुः वा संज्ञा विधीयते।

## लघुः

छन्दःशास्त्रे ह्रस्वसंज्ञः स्वरः लघुसंज्ञो भवति। छन्दो लक्षणेषु अस्य निर्देशः ‘ल’ इति पदेन क्रियते, अस्य संकेतचिह्नं च सरलरेखासदृशं (।) भवति।

## गुरुः

दीर्घसंज्ञः स्वरः गुरुः उच्यते। छन्दस्सु अनुस्वारेण सहितः, विसर्गेण युक्तः, संयोगपूर्वः, पदान्तगो ह्रस्ववर्णश्च गुरुसंज्ञको भवति। पदान्ते विद्यमानः गुरुवर्णोऽपि क्वचित् विकल्पेन लघुः मन्यते। छन्दोमञ्जर्याम् उक्तम् -

**सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्।**

**वर्णः संयोगपूर्वश्च तथा पदान्तगोऽपि वा॥**

छन्दो लक्षणेषु गुरुवर्णस्य निर्देशः 'ग' इति संक्षिप्ताक्षरेण क्रियते। अस्य संकेतचिह्नं च अवग्रहवत् (ऽ) भवति।

## गणः

छन्दस्सु वर्णानां मात्राणां च गणनार्थं गणव्यवस्था विधीयते। तत्र वार्णिकच्छन्दस्सु वर्णानां गणनायै वर्णात्मकगणाः प्रयुज्यन्ते। एतैः गणैः छन्दस्सु लघुगुरुवर्णानां क्रमः निश्चीयते।

अष्टौ भेदाः भवन्ति ते यथा -

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।**

**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥**

| | |
|---|---|
| मगणः | ऽऽऽ |
| नगणः | ।।। |
| भगणः | ऽ।। |
| यगणः | ।ऽऽ |
| जगणः | ।ऽ। |
| रगणः | ऽ।ऽ |
| सगणः | ।।ऽ |
| तगणः | ऽऽ। |

गणस्वरूपं लघुनोपायेन ज्ञातुमेकं लघुसूत्रमपि विद्यते - "यमाताराजभानसलगाः"

**आदिमध्यावसानेषु भजसा यान्ति गौरवम्।**

**यरता लाघवं यान्ति मनौ तु गुरुलाघवम्॥**

## यतिः

पद्यपाठे जिह्वायाः विश्रामस्थानं कविभिः यतिः उच्यते। विच्छेदः, विरामः, विरतिः, इत्यादयः यतिपर्यायाः।

## १. अनुष्टुप्

**लक्षणम् -** श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।

द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥

**उदाहरणम्-** वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वती परमेश्वरौ॥

## २. इन्द्रवज्रा

| | | | |
|---|---|---|---|
| तगणः | तगणः | जगणः | ग. ग. |
| ऽऽ। | ऽऽ। | ।ऽ। | ऽ ऽ |

**लक्षणम्-** "स्यादिन्द्रवज्रा यदि तौ जगौ गः"

अस्य छन्दसः प्रत्येकं चरणे ११ वर्णाः भवन्ति। सर्वेषु पादेषु क्रमशः तगणः, तगणः, जगणः, द्वौ गुरुवर्णौ च भवतः। यद्यपि इह यतिनिर्देशो नास्ति तथापि पञ्चमे, षष्ठे च अक्षरे यतिः भवति।

**उदाहरणम्-** अर्थोहि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः।

जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

## ३. उपेन्द्रवज्रा

| | | | |
|---|---|---|---|
| जगणः | तगणः | जगणः | ग. ग. |
| ।ऽ। | ऽऽ। | ।ऽ। | ऽ ऽ |

**लक्षणम्-** उपेन्द्रवज्रा जतजास्ततोगौ

अस्य छन्दसः प्रत्येकं पादे ११ वर्णाः भवन्ति। सर्वेषु चरणेषु क्रमशः जगणः, तगणः, जगणः, द्वौ गुरुवर्णौ च भवतः।

**उदाहरणम्-** त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।

त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव॥

## ४. शालिनी

| | | | |
|---|---|---|---|
| मगणः | तगणः | तगणः | ग. ग. |
| ऽऽऽ | ऽऽ। | ऽऽ। | ऽ ऽ |

**लक्षणम्-** मात्तौ गौ चेच्छालिनी वेद लोकैः

प्रत्येकं चरणे ११ वर्णाः भवन्ति। क्रमशः एको मगणः, द्वौ तगणौ, द्वौ च गुरुवर्णौ भवतः तच्छन्दः "शालिनी" इति ज्ञेयम्। चतुर्थे (वेदाः) सप्तमे (लोकाः) चाक्षरे विरामः कार्यः।

**उदाहरणम् -** कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च॥

## ५. भुजङ्गप्रयातम्

| यगणः | यगणः | यगणः | यगणः |
|---|---|---|---|
| ।ऽऽ | ।ऽऽ | ।ऽऽ | ।ऽऽ |

**लक्षणम् -** 'भुजङ्गप्रयातं चतुर्भिर्यकारैः'

प्रत्येकं चरणे १२ वर्णाः भवन्ति। क्रमशः चत्वारः यगणाः भवतः तच्छन्दः भुजङ्गप्रयातम् इति ज्ञेयम्। पदान्ते विरामः कार्यः।

**उदाहरणम् -** नमस्ते सदा वत्सले मातृभूमे त्वया हिन्दुभूमे सुखं वर्धितोऽहम्।
महामङ्गले पुण्यभूमे त्वदर्थे पतत्वेष कायो नमस्ते नमस्ते॥
त्वमेव शरण्यं त्वमेव वरेण्यं त्वमेव जगत्पालकं स्वप्रकाशम्।
त्वमेकं जगत्कर्तृ पातृ प्रहन्तृ त्वमेकं परं निश्चलं निर्विकारम्॥

## ६. हरिणी

| नगणः | सगणः | मगणः | रगणः | सगणः | ल. ग. |
|---|---|---|---|---|---|
| ।।। | ।।ऽ | ऽऽऽ | ऽ।ऽ | ।।ऽ | । ऽ |

**लक्षणम् -** नसमरसलागः षड्वेदैर्हयैर्हरिणी मता।

यस्य छन्दसः प्रतिचरणे नगण-सगण-मगण-रगण-सगणाः लघुगुरू च वर्णाः भवन्ति। तच्छन्दः हरिणी। सप्तदशवर्णाः भवन्ति अस्मिन् छन्दसि। षष्ठे (रसाः) चतुर्थे (वेदाः) सप्तमे (हयैः) च वर्णे विरामः कर्तव्यः।

**उदाहरणम् -** अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥

## ७. शिखरिणी

| यगणः | मगणः | नगणः | सगणः | भगणः | ल. ग. |
|---|---|---|---|---|---|
| ।ऽऽ | ऽऽऽ | ।।। | ।।ऽ | ऽ।। | । ऽ |

**लक्षणम्** - रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी।

सप्तदश वर्णाः वर्तन्ते अस्मिन् छन्दसि। क्रमशः यगण-मगण-नगण-सगण-भगणाः लघुगुरुवर्णौ च भवन्ति। अस्मिन् छन्दसि रसैः षड्वर्णान्ते रुद्रैः एकादशवर्णान्ते च यतिः अर्थात् विरामो भवति।

**उदाहरणम्** - यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित् किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥

## ८. द्रुतविलम्बितम्

| नगणः | भगणः | भगणः | रगणः |
|---|---|---|---|
| ।।। | ऽ।। | ।ऽऽ | ऽ।ऽ |

**लक्षणम्** - द्रुतविलम्बितमाह नभौ भरौ

यस्य छन्दसः प्रतिचरणं क्रमशः नगण-भगण-भगण-रगणाः भवन्ति, तत् द्रुतविलम्बितनामकं छन्दो भवति। अस्य प्रत्येकं चरणे द्वादशवर्णाः भवन्ति।

**उदाहरणम्** - इतरपापफलानि यदृच्छया वितर तानि सहे चतुरानन।
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख! मा लिख! मा लिख!॥

## ९. वसन्ततिलका

| तगणः | भगणः | जगणः | जगणः | ग. ग. |
|---|---|---|---|---|
| ऽऽ। | ऽ।। | ।ऽ। | ।ऽ। | ऽ ऽ |

**लक्षणम्** - उक्ता वसन्ततिलका तभजा जगौ गः।

वसन्ततिलकाच्छन्दसः प्रत्येकं चरणे चतुर्दश वर्णाः भवन्ति। क्रमशः तगणः भगणः जगणौ गुरू च भवन्ति।

**उदाहरणम्** - यात्येकतोऽस्तशिखरं पतिरोषधीनाम् आविष्कृतोऽरुणपुरः सर एकतोऽर्कः।

तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु॥

## १०. मन्दाक्रान्ता

| मगणः | भगणः | नगणः | तगणः | तगणः | ग. ग. |
|---|---|---|---|---|---|
| ऽऽऽ | ऽ।। | ।।। | ऽऽ। | ऽऽ। | ऽ ऽ |

**लक्षणम् -** "मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्"

अस्मिन् छन्दसि प्रत्येकं चरणे यथाक्रमं मगणः, भगणः, नगणः, द्वौ तगणौ अन्ते च गुरुद्वयम् आगच्छन्ति। अपि च चतुर्थे (अम्बुधिः) षष्ठे (रसाः) सप्तमे (नगाः) वर्णे यतिः भवति, इति सप्तदशवर्णात्मकं छन्दः भवति।

**उदाहरणम् -** कश्चित्कान्ता विरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनया स्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

## ११. शार्दूलविक्रीडितम्

| मगणः | सगणः | जगणः | सगणः | तगणः | तगणः | ग. |
|---|---|---|---|---|---|---|
| ऽऽऽ | ।।ऽ | ।ऽ। | ।।ऽ | ऽऽ। | ऽऽ। | ऽ |

**लक्षणम् -** सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्

अस्मिन् छन्दसि सर्वेषु पादेषु क्रमशः मगणः, सगणः, जगणः, सगणः, द्वौ तगणौ, अन्ते च गुरुवर्णः भवन्ति। अस्मिन् छन्दसि एकोनविंशतिः अक्षराणि भवन्ति। अस्मिन् छन्दसि द्वादशवर्णे (सूर्यैः) सप्तमवर्णे अश्वैः च विरामो (यतिः) भवति।

**उदाहरणम् -** केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

## १२. स्रग्धरा

मगणः रगणः भगणः नगणः यगणः यगणः यगणः

ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

**लक्षणम् -** म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्

यस्य छन्दसः प्रतिचरणं क्रमशः मगणः, रगणः, भगणः, नगणः, त्रयः यगणाश्च भवन्ति, तच्छन्दः स्रग्धरा इति। एकविंशतिवर्णात्मकेऽस्मिन् छन्दसि प्रतिसप्तमे वर्णे यतिः भवति।

**उदाहरणम् -** या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री

ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।

यामाहुः सर्वबीज प्रकृतिरिति यया प्राणिनः प्राणवन्तः

प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

## शब्दार्थाः

| | |
|---|---|
| वैदिक- लौकिक-वाङ्मये | वैदिक-लौकिकशास्त्रे |
| शिक्षायाम् | शिक्षाग्रन्थे |
| वेदार्थनिर्णये | वेदार्थनिर्धारणे |
| सानुस्वारः | अनुस्वारेण युक्तः |
| मस्त्रिगुरुः | मगणे त्रयो वर्णा भवन्ति |
| भादिगुरुः | भगणे प्रथमः लघुवर्णः भवति |
| आदिलघुः | आदौ लघुः |
| सोऽन्तगुरुः | अन्ते गुरुः |

## अभ्यासः

१. **संस्कृतभाषया प्रश्नानाम् उत्तराणि लिखत -**

(क) छन्दश्शास्त्रे यतिशब्दस्य कोऽर्थः ?

(ख) कति गणाः भवन्ति ?

(ग) प्रत्येकं पादे चत्वारः यगणाः कस्मिन् छन्दसि भवति ?

(घ) नगणस्य स्वरूपं विलिख्यताम् ?

(ङ) कस्मिन् गणे त्रिगुरु भवति ?

(च) छन्दःशास्त्रस्य प्रणेता कः वर्तते ?

(छ) गायत्रीच्छन्दसि कति अक्षराणि सन्ति ?

(ज) जगतीच्छन्दसो लक्षणं लिखत।

## २. पूर्णवाक्येन उत्तरत।

(क) शार्दूलविक्रीडितच्छन्दसः लक्षणं लिखत।

(ख) शिखरिणीछन्दसः उदाहरणं लिख्यताम्।

(ग) मन्दाक्रान्ताछन्दसः लक्षणं सोदाहरणं निरूपयत।

(घ) इन्द्रवज्राच्छन्दसि कति अक्षराणि भवन्ति।

(ङ) भुजङ्गप्रयातच्छन्दसि के गणा भवन्ति।

(च) अनुष्टुब्छन्दसः उदाहरणं लिखत।

(छ) पङ्क्तिच्छन्दसि कति पादाः सन्ति?

## ३. रिक्तस्थानानि पूरयत -

(क) ..................................... स्रग्धरा कीर्तितेयम्।

(ख) मन्दाक्रान्ताम्बुधिरसनगैर्मो ..............................।

(ग) भुजङ्गप्रयातं ..........................................।

(घ) सानुस्वारश्च .............................. च गुरुर्भवेत्।

(ङ) त्वमेकं ................................ निर्विकारम्।

(च) यो ह वा अविदितार्षेयच्छन्दो ................. वा पापीयान् भवति।

## ४. 'क' खण्डं 'ख' खण्डेन सह योजयत -

| (क) | (ख) |
|---|---|
| इन्द्रवज्रा | एकोनविंशतिः अक्षराणि |
| मन्दाक्रान्ता | एकादशवर्णाः |
| स्रग्धरा | चतुर्भिर्यकारैः |

| | |
|---|---|
| वसन्ततिलका | एकविंशतिवर्णात्मकं वृत्तम् |
| भुजङ्गप्रयातम् | चतुर्दशवर्णाः |
| शार्दूलविक्रीडितम् | सप्तदशवर्णाः |

## ५. वस्तुनिष्ठप्रश्नाः

(क) छन्दःशास्त्रं केन विरचितम् ?

(अ) लगधमुनिना (आ) पिङ्गलमुनिना

(इ) सायणाचार्येण (ई) पाणिनिना

(ख) छन्दःशास्त्रस्य नाम नास्ति ?

(अ) छन्दोविचितिः (आ) छन्दोविवृत्तिः

(इ) छन्दोऽनुशासनम् (ई) छन्दाचरणम्

(घ) संयुक्तवर्णस्य पूर्ववर्ती वर्णो भवति।

(अ) लघुः (आ) गुरुः

(इ) यादृच्छिकः (ई) नियमो नास्ति

(ङ) तगणस्य स्वरूपमस्ति -

(अ) अन्तलघुः (आ) अन्तगुरुः

(इ) आदिलघुः (ई) मध्यगुरुः

(च) नगणस्य स्वरूपमस्ति -

(अ) मध्यगुरुः (आ) आदिलघुवर्णः

(इ) अन्तलघुः (ई) त्रिलघुवर्णाः

(छ) उष्णिक्छन्दसि कति अक्षराणि भवन्ति ?

(अ) ३२ (आ) ३६

(इ) २४ (ई) २८

## ६. कोष्ठकात् चित्वा शून्यस्थानानि पूरयत -

| हरिणीच्छन्दसि, विसर्गी, वसन्ततिलकाच्छन्दसि, गुरुलाघवम्, भुजङ्गप्रयातम् |
|---|

(क) सानुस्वारश्च दीर्घश्च ........... च गुरुर्भवेत्।

(ख) यरता लाघवं यान्ति मनौ तु ..............।

(ग) ................ चतुर्भिर्यकारैः।

(घ) सप्तदश वर्णाः भवन्ति ..............।

(ङ) चतुर्दश वर्णाः भवन्ति ................... ।

**७. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं निर्णयत -**

| | विग्रहः | समासनाम |
|---|---|---|
| (क) सानुस्वारः | .................... | ......................... |
| (ख) जगौ | .................... | ......................... |
| (ग) प्रत्यर्पितन्यासः | .................... | ......................... |
| (घ) पुण्यभूमिः | .................... | ......................... |
| (ङ) जनकतनया | .................... | ......................... |

**८. गणविभागं विलिख्य छन्दोनाम लिखत -**

(क) मातेव रक्षति पितेव हिते नियुङ्क्ते ।

(ख) पिबन्ति नद्यः स्वयमेव नाम्भः ।

(ग) हितं मनोहारि च दुर्लभं वचः ।

**९. अधोलिखितच्छन्दसां लक्षणं वर्णयत -**

**यथा - भुजङ्गप्रयातं चतुर्भिर्यकारैः**

(क) हरिणी

(ख) शिखरिणी

(ग) मन्दाक्रान्ता

(घ) स्रग्धरा

(ङ) शार्दुलविक्रीडितम्

(च) गायत्री

(छ) त्रिष्टुप्

## योग्यताविस्तारः

### छन्दः

छन्दोयुक्तपद्यं वृत्तं जातिश्चेति द्विधा विभक्तम्। अक्षरगणकं छन्दः वृत्तम्। मात्रागणकं छन्दः जातिः। अक्षरगणकं छन्दः सर्वत्र दृश्यते इति इह केषाञ्चन वृत्तानां परिचयः क्रियते।

### वंशस्थम्

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या द्वादश भवति।

**लक्षणम् -** **"जतौ तु वंशस्थमुदीरितं जरौ"** जगण-तगण-जगण-रगणाः भवन्ति।

**उदाहरणम् -** सहसा विदधीत न क्रियामविवेकः परमापदो पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥

### मालिनी

एतस्मिन् वृत्ते प्रतिचरणम् अक्षराणां संख्या पञ्चदश भवति।

**लक्षणम् -** **"ननमयययुतेयं मालिनी भोगिलोकैः"**

**उदाहरणम् -**विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं निनादौ दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥

### पृथ्वी

एतस्मिन् छन्दसि सप्तदशाक्षराणि भवन्ति।

**लक्षणम् -** **"जसौ जसयलावसुग्रहयतिश्च पृथ्वी गुरुः"**।

**उदाहरणम् -** लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥

### उपजातिः

**लक्षणम् -** **"अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः"**।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम॥

**उदाहरण् -** अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः॥

**आर्यच्छन्दः**

**लक्षणम् -** "यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि"।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या॥

**उदाहरणम् -** अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति॥

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी
यत्र विश्वं भवत्येकनीडम्

# दशमः पाठः

## वेदे पर्यावरणविषयकं चिन्तनम्

'पर्यावरणम्' इति शब्दो निखिलेऽस्मिन् जगति सुप्रसिद्धः सर्वैः ज्ञातश्च। वरणार्थकाद् वृङ् इति धातोः परि-आङ् इति उपसर्गद्वयपूर्वकाद् ल्युट् प्रत्यये कृते पर्यावरणमिति शब्दो निष्पन्नोऽस्ति। परितः आव्रियते जीवो येन तत् पर्यावरणम्। यमाश्रित्य जीवाः परोक्षं प्रत्यक्षं च भृशं प्रभाविता भवन्ति तदेव पर्यावरणम् इति तात्पर्यम्। पञ्चभूतानि परोक्षं प्रत्यक्षं च भृशं जीवान् प्रभावयन्ति। अस्मान् परितः ये सन्ति प्रकृतिस्थाः पदार्थाः ते पर्यावरणम् इति परिगण्यन्ते। जीवाः, जन्तवः, कीटाः, पतङ्गाः, वृक्षाः, लताः, जलम्, वायुः, प्रकाशः, गन्धः, पर्वतः, सरांसि, परिवेशः, अन्ये च ईदृशाः मिलिताः पर्यावरणतत्त्वेषु परिगण्यन्ते। नीरोगितया स्वस्थतया च जीवनयापनाय मनुष्याणां कृते शुद्धानि अकलुषितानि भोजनावासवस्त्रादीनि यथा अपरिहार्याणि तथा शुद्धम् अकलुषितं च पर्यावरणम् अपरिहेयम्। यथार्थतः शुद्धा निर्मला प्रकृतिरेव पर्यावरणस्य संवाहिका संरक्षिका च विद्यते, सा प्रकृतिरेव मानवमात्रस्य तर्पयित्री। अनेके विद्वांसः पर्यावरणं प्रकृतेः संरचनारूपम् इति वर्णयन्ति। प्रकृतिपर्यावरणयोः अभेदः सम्बन्धः। सर्वेऽपि जीवाः पर्यावरणेन सह सर्वथा सम्बद्धाः सन्ति। मानवानां कृते वनस्पतयः, अन्ये जीवाः, जन्तवः च पर्यावरणरूपाः विद्यन्ते। वनस्पतीनां कृते मानवाः अन्ये जीवाः, जन्तवश्च पर्यावरणस्य नियामकाः सन्ति। पर्यावरणस्य संरक्षणदृष्ट्या वृक्षाणाम् औषधीनाञ्च अत्यन्तं महत्त्वं वर्तते।

वर्त्तमानकाले सर्वत्र जायमानं पर्यावरणप्रदूषणं सर्वत्र श्रूयते, सर्वैः अनुभूयते च। विषमम् इदं पर्यावरणप्रदूषणं जीवघातकं शनैश्शनैः अवसादकं सोढुमशक्यं दुःसाध्यं च। सम्प्रति योजनानिर्मातारः, वैज्ञानिकाः, चिन्तका अन्ये च गवेषकाः पर्यावरणप्रदूषणस्य निवारणे अहोरात्रं चिन्तनपरा दृश्यन्ते। प्रतिवर्षं समये समये पर्यावरणप्रदूषणं भीषणं रूपं धृत्वा पीडयति समग्रं विश्वम्।

अनियन्त्रिता सती प्रतिक्षणं वायुवेगेन प्रवर्द्धमाना जनसंख्या, मलमूत्रादीनां त्याज्यवस्तूनां यथास्थानम् उत्सर्जना-भावः, भवनादिनिर्माणकार्येण सर्वत्र धूलीविक्षेपः, कृषिक्षेत्रेषु अग्निना तुषकण-धान्यावशेषदाहः, लघुबृहदुद्योगैः त्याज्य-धूमप्रवाहः, वाहनधूमः, अणुविकिरणम्, नदीजले लघुबृहदुद्योगैः त्याज्यस्रावः, वैद्यकीय-त्यागः, प्लास्तिक-त्यागः च पर्यावरण-

समस्यायाः मूलानि कारणानि सन्ति। मनुष्याणाम् आचारविहीनता, भूमेः उर्वरकत्व-संवर्धनार्थम् उर्वरकस्य प्रयोगः, वृक्षसस्यादीनां कर्त्तनम्, पर्वतानां विलयः, नानाविधानां जीववैविध्यानां पशुपक्षिणां च न्यूनीभावः, नदीनां धारावरोधादयः च पर्यावरणप्रदूषणस्य उपोद्बलकानि सन्ति। वैज्ञानिकाः, पर्यावरणविशेषज्ञाः च पर्यावरण-समस्यायाः विविधरूपाणि परिशील्य ज्ञात्वा च पर्यावरणसंरक्षणे विविधान् उपायान् उपदिष्टवन्तः। कार्यशालासु, गवेषणसत्रेषु, संगोष्ठीषु, सम्मेलनेषु च पर्यावरणसंरक्षणविषये विद्वद्भिः उपस्थापितान् विचारान् कार्यपथं नीत्वा पर्यावरणप्रदूषणस्य निवारणे वयं समर्था भवेम।

पर्यावरणं हि सर्वेषां प्राणिनां जीवनस्य आधारभूतं तत्त्वं विद्यते। विश्वस्मिन् सर्वे प्राणिनः पृथिवीं जलं वायुं तेजः आकाशं चाश्रित्यैव प्राणन्ति, प्रीणन्ति च। अत एव अशेषजीवराशेः पर्यावरणसंरक्षणम् अनिवार्यमस्ति। पृथ्वी-जल-वायुप्रभृतीनां प्रदूषणात् संरक्षणं, प्राणिनां हिताय तेषां सम्यक् उपयोग एव यथार्थतया पर्यावरणस्य संरक्षणम्। सम्प्रति प्रदूषणस्य निवारणार्थं वृक्षाणां वनानां वा महत्त्वं सर्वोपरि विविधैः विशेषज्ञैः वैज्ञानिकैश्च स्वीकृतमस्ति। यतो हि वृक्षा हानिकारकं नाइट्रोजन-नामकं वायुं स्वस्य प्रवर्धनाय गृह्णन्ति जीवनदायकं सुखकरम् ऑक्सिजन-नामकं प्राणवायुं च सर्वेभ्यः प्रददति।

वेदेषु आविष्कृतम् ऋषिभिः दृष्टं ज्ञानम् अतिप्राचीनम्, अतिनवीनमपि, तच्च अनुभवैकवेद्यम्। ते वेदा अस्माकं ज्ञानविज्ञानयोः शेवधिः, वैज्ञानिकचिन्तनानाम् उत्सः, संस्कृतेः आद्यं स्रोतश्च विद्यन्ते। वेदमन्त्रेषु पर्यावरणस्य संरक्षणार्थमपि प्रेरणा प्रदत्ता, वेदेषु पर्यावरणस्य संरक्षणार्थं लोकमङ्गलार्थं च उपाया वर्णिता विद्यन्ते। "नमो वृक्षेभ्यः। 'ओषधीनां पतये नमः।' अरण्यानां पतये नमः। नमो वन्याय च।" इति नानामन्त्रेषु वृक्षेभ्यः श्रद्धापूर्वकं नमस्काराः प्रस्तुताः संश्रूयन्ते। वृक्षाणां महत्त्वविषये वैज्ञानिकं सत्यं वेदमन्त्रेषु अपि सुस्पष्टं दृश्यते।

वृक्षा वनस्पतय ओषधयश्च सर्वेषां कृते मधुमयाः हितसाधिकाः, शान्तिप्रदाश्च भवेयुरित्येताः भावनाः ऋग्वेदस्य प्रथममण्डले नवतितमे सूक्ते अन्यत्र वेदेषु च अभिव्यक्ताः दृश्यन्ते।

**मधु वाता ऋतायते मधुं क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः** ॥१.९०.६॥

**मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता** ॥१.९०.७॥

**मधुमान्नो वनस्पतिर्मधुमान् अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः** ॥१.९०.८॥

वायुः मधुमयो भवतु, नद्यः मधुजलधारां संस्रावयन्तु, ओषधयो मधुमया भवन्तु, रात्रिः मधुरा भवतु, उषाकालः मधुमयो भवतु, पृथिव्याः प्रत्येकं रजः अपि मधुरं भवतु, अस्माकं संरक्षकः द्युलोकः माधुर्ययुतः भवतु, रोगेभ्यः संरक्षकः वनस्पतिः मधुरः भवतु, सूर्यः मधुरो भवतु, गावः मधुरक्षीरप्रदा भवन्तु इति ऋचो ज्ञायते।

**ऋग्वेदस्य अरण्यानीसूक्ते** *(१०.१४६.६)*

**आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम्।**

**प्राहं मृगाणां मातरमरण्यानिमशंसिषम्॥**

इत्यत्र कस्तूरीसुगन्धेन युक्तस्य, सुगन्धिनः, फल-मूलादिभिः भक्ष्यैः अन्नैश्च प्रपूर्णस्य, कृषिवलैः रहितस्य अरण्यानेः स्तुतिरस्ति।

अत्र ऋचि ऋषीणां तात्पर्यमस्ति यदि मे वृक्षाः अन्ये च वायुः, ओषधिः, लताः च न केवलं विश्वं संवर्धयन्ते, अपि तु प्राणवायुना पर्यावरणमपि मधुमयं कुर्वन्ति। प्रदूषणरहितः शुद्धः वायुरेव स्वास्थ्यप्रदो जीवनदायकश्चेति वैज्ञानिकं सत्यम् ऋचः प्रकाशयन्ति। वृक्षा वनस्पतयश्च न केवलं प्रदूषणं दूरीकुर्वन्ति, अपि तु मेघानां आबन्धनेन वृष्ट्युत्पादने च साहाय्यं कुर्वन्ति। इत्थं ते पर्यावरणस्य महोपकारकाः भवन्ति। अतस्ते न केवलं संरक्षणीया अपितु नूतना वृक्षा अपि आरोपणीयाः।

वृक्षाणां छेदनं कर्तनं वा हिंसैव। वृक्षाः लताः वा चैतन्यं भजन्ते। मलमूत्रादिविसर्जनेन जलानि प्रदूषितानि भवन्ति। अतिशय-धन-लाभाय रासायनिक-उर्वरकाणाम् अतिशयितप्रयोगेन पृथिव्याश्शोषणं प्रदूषणञ्च नितरां भवति। उपलशकलानां स्फोटनाय पर्वतानां नाशो वनानां छेदनञ्च भूमिप्रदूषणाय कल्पते। अनेन पर्यावरणस्य महती हानिर्जायते। भारतम् आध्यात्मिको देशः। ऋषीणां तपो भूमिः। अस्माकम् ऋषयः पर्यावरणज्ञा वर्तन्ते। अत एव आध्यात्मिकदृष्ट्या पर्यावरणसंरक्षणोपायाः प्रतिपादिताः वेदेषु शास्त्रेषु पुराणेषु च। तथा हि **द्यौः शान्तिरन्तरिक्षं शान्तिः पृथ्वी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिः ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि।** इत्यस्मिन् (शुक्लयजुर्वेदः ३६/१७) मन्त्रे द्यौः, अन्तरिक्षम्, पृथ्वी, आपः, ओषधयः, वनस्पतयः, विश्वे देवाः च उपलक्ष्य समष्टिरूपेण पर्यावरणसंरक्षणाय शान्तेः प्रार्थना कृता। अतो वेदमन्त्रेषु विहितया रीत्या भूमि-जल-वाय्वाकाशानां प्रदूषणस्य निषेधः पर्यावरणसंरक्षणाय अतितराम् आवश्यकः समीचीनतमः च

पन्थाः, ऋषीणां नीतिविदां निर्णयश्च विद्यते। प्रकृतिं विहाय विकृतिं समायातानां विकृतां जीवनशैलीं भजतां प्राणिनां जीवनं व्यर्थं भवति, अत एव पर्यावरणविशुद्धये स्वास्थ्यलाभाय च कृताऽत्र प्रार्थना।

**गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु ।**

**बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।**

**अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम्॥ ११॥**

**त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः ।**

**तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति ॥१५॥**

**विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्।**

**शिवां स्योनामनुचरेम विश्वहा॥ १७॥**

**भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः।**

**सा नो भूमिः प्राणमायुर्ददातु जरदष्टिं मा पृथिवी कृणोतु॥ २२॥**

**ग्रीष्मस्ते वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः।**

**ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम्॥ ३६॥**

**यस्यामन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः।**

**भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे॥ ४२॥**

इति अथर्ववेदस्य द्वादशकाण्डस्य प्रथमे पृथिवीसूक्ते पृथिवीविषयकं चिन्तनं पर्यावरणविषयचिन्तनेन सह सुष्ठु ऋषिः अथर्वा अपश्यत्।

संस्कृतवाङ्मयेऽपि पर्यावरणविषयकं सुष्ठु ज्ञानं लभ्यते, वृक्षमहत्त्वं च वर्णितमस्ति । वृक्षाणां स्पर्श-श्रवण-दर्शन-घ्राण-रसन-पान-चैतन्य-वृद्धि-गुणाः सन्तीति महाभारतस्य महर्षिः भृगुः प्रतिपादयति। भगवान् श्रीकृष्णः गीतायां "अश्वत्थः सर्ववृक्षाणाम्" इति (१०.२६) निगदन् अश्वत्थस्य श्रेष्ठतां प्रतिपादयामास । संस्कृतसुभाषितानि वृक्षारोपणार्थं जनान् प्रेरयन्ति । वराहपुराणे तदुक्तं यथा-

**यः पुमान् रोपयेद् वृक्षान् छायापुष्पफलोपगान्।**

सर्वसत्त्वोपयोगाय स याति परमां गतिम्॥

**स्कन्दपुराणे-**

**अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश चिञ्चिणीकान्।**

**कपित्थ-बिल्वामलक-त्रयं च पञ्चाम्ररोपी नरकं न याति॥**

इति पद्येन अश्वत्थादीनां संरोपणेन सुमहत्फलं लभ्यते इति प्रतिपादितमस्ति। प्रत्यक्षं तच्च फलं पर्यावरणस्य संरक्षणं, पर्यावरणस्य प्रदूषणात् प्रकृतेः, मानवानां, प्राणिनां, समस्तस्य जगतः संरक्षणमेव।

## शब्दार्थाः

| | |
|---|---|
| भृशम् | अतिशयः |
| अपरिहेयम् | त्यक्तुमशक्यम् |
| संवाहिका | नियन्त्रिका |
| तर्पयित्री | परितोषिका |
| जीवघातकं | जीवस्य नाशकम् |
| अणुविकिरणम् | लघुरश्मिः |
| उर्वरकत्वम् | वपनयोग्या भूमिः |
| परिशील्य | विचार्य |
| प्रीणन्ति | स्निह्यन्ति |
| प्राणन्ति | जीवन्ति |
| गन्धः | सुष्ठु द्रव्यविशेषः/सौरभम् |
| स्त्रोतः | आकरः |
| शेवधिः | निधिः |
| वन्याय | वनसम्बद्धाय |
| सिन्धवः | सागरः |

| | |
|---|---|
| आव्रियते | आच्छाद्यते |
| सुरभिम् | सुगन्धिम् |

# अभ्यासः

१. **एकवाक्येन उत्तरं दत्त -**

(क) परि-आङ् इत्युपसर्गद्वयपूर्वकात् ल्युट् प्रत्यये कः शब्दो निष्पन्नः ?

(ख) शुद्धा निर्मला प्रकृति कस्य संवाहिका रक्षिका च विद्यते ?

(ग) के अस्माकं ज्ञानविज्ञानयोः शेवधिः ?

(घ) वृक्षाणां छेदनं कर्तनं च कीदृशं पापं भवति ?

(ङ) पर्यावरणज्ञाः के वर्तन्ते ?

२. **संस्कृतभाषया उत्तरं देयम् -**

(क) अथर्ववेदस्य कस्मिन् सूक्ते पर्यावरणविषयो वर्णितः ?

(ख) अश्वत्थः सर्ववृक्षाणाम् इति पङ्क्तिः कुतः गृहीता ?

(ग) `यः पुमान् रोपयेद्वृक्षान् छायापुष्पफलोपगान्` इत्यस्यार्थः कः ?

(घ) कः नरकं न याति ?

(ङ) वर्त्तमानकाले सर्वत्र पर्यावरणं कथं दृश्यते ?

३. **रिक्तस्थानं भरत -**

(क) योजनानिर्मातारः .......................... अहोरात्रं चिन्तनपरा दृश्यन्ते।

(ख) .......................... पर्यावरणसमस्यायाः मूलानि कारणानि।

(ग) वृक्षाः हानिकारकं .......................... वायुञ्च सर्वेभ्यः प्रददाति।

(घ) मधुवाता .......................... सन्त्वोषधीः।

(ङ) आञ्जनगन्धिं .............................. अशंसिषम्।

(च) द्यौः शान्तिरन्तरिक्षम् ...................... सामा शान्तिरेधि।

४. **सन्धिपदं विभज्य सन्धिसूत्राणि लिखत -**

| | | सन्धिविच्छेदः | सूत्राणि |
|---|---|---|---|
| (क) | भोजनावासः | ............. + ............. | .................. |

(ख) शनैश्शनैः ............. + ............. ..................

(ग) दुस्साध्यम् ............. + ............. ..................

(घ) अनुभवैकवेद्यम् ............. + ............. ..................

(ङ) नमो वृक्षेभ्यः ............. + ............. ..................

(च) संरक्षणोपायः .............. + ............. ..................

(छ) वाय्वाकाशानाम् ..............+............... ..................

(ज) संस्कृतवाङ्मयेऽपि ..............+................ ...................

५. **समुचितं युग्मम् -**

| | |
|---|---|
| (क) वायुः | मधुरजलधारां संस्रावयन्तु |
| (ख) ओषधयो | मधुमयो भवतु |
| (ग) रात्रिम् | मधुमयाः भवन्तु |
| (घ) उषा | संरक्षतः वनस्पतिः मधुरो भवतु |
| (ङ) वृक्षा लता वा | कालो मधुमयो भवतु |
| (च) ग्रीष्मस्ते वर्षाणि | शरद्धेमन्तशिशिरवसन्ताः |
| (छ) रोगेभ्य | चैतन्यं भजन्ते |
| (ज) नद्यः | अधिरा भवतु |

६. **अधोलिखितानां शब्दानां पर्यायपदानि विलिखत।**

मानवाः, वृक्षः, जलम्, वायुः, प्रकाशः, गन्धः, पशवः,
नदी, वनम्, उषाकालः, अन्नम्, पर्यावरणम्।

७. **अधस्तनानां समस्तपदानां विग्रहवाक्यं विलिख्य समासनाम लिखत।**

| | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| (क) पर्यावरणप्रदूषणम् | .......................... | .......................... |
| (ख) अहोरात्रः | .......................... | .......................... |
| (ग) प्रतिवर्षम् | .......................... | .......................... |
| (घ) भूमिजलवाय्वाकाशाः | .......................... | .......................... |
| (ङ) मधुरक्षीरप्रदा | .......................... | .......................... |

(च) मलमूत्रादिविसर्जनेन ........................... ...........................

## ८. प्रयोगपरिवर्तनं कुरुत -

(क) वृक्षाः लता वा चैतन्यं भजन्ते।

(ख) निखिलेऽस्मिन् जगति सुप्रसिद्धः सर्वैः ज्ञातश्च।

(ग) वैज्ञानिकाः पर्यावरणप्रदूषणस्य निवारणे अहोरात्रं चिन्तनपराः दृश्यन्ते।

(घ) पर्यावरणं सर्वेषां प्राणिनां जीवनस्य आधारभूतं तत्त्वं विद्यते।

(ङ) अस्माकम् ऋषयः पर्यावरणज्ञाः वर्तन्ते।

(च) अश्वत्थादीनां संरोपणेन सुमहत्फलं लभ्यते।

## ९. प्रकृतिप्रत्यय-विभागं कुरुत -

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) श्रूयते | .................... | ......................... |
| (ख) आश्रित्य | .................... | ......................... |
| (ग) निषेधः | .................... | ......................... |
| (घ) कृता | .................... | ......................... |
| (ङ) प्रदूषणम् | .................... | ......................... |
| (च) ज्ञात्वा | .................... | ......................... |
| (छ) आरोपणीयाः | .................... | ......................... |
| (ज) छेदनम् | .................... | ......................... |

## १०. अधस्तनैः क्रियापदैः वाक्यनिर्माणं कुरुत।

विद्यन्ते, पीडयति, भवेम, प्रीणन्ति, प्रददति, विद्यन्ते, दृश्यन्ते,
भवन्तु, संरक्षणीया, प्रेरयन्ति।

## ११. स्थूलपदान्याधृत्य प्रश्ननिर्माणं कुरुत -

(क) वनस्पतीनां कृते मानवाः अन्ये जीवाः,जन्तवश्च **पर्यावरणस्य** नियामकाः सन्ति।

(ख) सम्प्रति **वैज्ञानिकाः** पर्यावरणप्रदूषणस्य निवारणे अहोरात्रं चिन्तनपराः दृश्यन्ते।

(ग) **पर्यावरणं** हि सर्वेषां प्राणिनां जीवनस्य आधारभूतं तत्वं विद्यते ।

(घ) **वृक्षाः** आरोपणीयाः ।

(ङ) सर्वेऽपि जीवाः **पर्यावरणेन** सह सर्वथा सम्बद्धाः सन्ति।

(च) संस्कृतसुभाषितानि **वृक्षारोपणार्थम्** अस्मान् प्रेरयन्ति।

## योग्यता-विस्तारः

**त्रीणि छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्।**
**आपो वाता ओषधयः तान्येकस्मिन् भुवन अर्पितानि॥**

*अथर्ववेदः - १८.१.१७*

**द्यां मा लेखीरन्तरिक्षं मा हिंसीः पृथिव्या सम्भव।** *यजुर्वेदः - ५.४३*

**पयोधरैराश्रमबालवृक्षान् संवर्धयन्ती स्वबलानुरूपैः।**
**असंशयं प्राक्तनयोपपत्तेः स्तनन्धयप्रीतिमवाप्स्यसि त्वम्॥**

*रघुवंशम् - १४.०७*

**अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन।**
**यो हेमकुम्भस्तननीः श्रितानां स्कन्दस्य मातुः पयसां रसज्ञः॥**

*रघुवंशम् - २.२६*

**अमरत्वं सदा कल्पो हरेश्चायतनं वटः।**
**न्यग्रोध! हर! मे पापं कल्पवृक्ष! नमोऽस्तु ते॥**

*ब्रह्मपुराणम् - ५८.१४*

**वाय्वाकाशा-जलादीनां प्रदूषण-निवारणम्।**
**संरक्षणञ्च भूम्यादेः पर्यावरण-रक्षणम्॥**
**भूमिं दृंह, पृथिवीं मा हिंसीः।**

*(यजुर्वेदः - १३.१८)*

**दिवं दृंह, दिवं मा हिंसीः।**

*(यजुर्वेदः - १५.६४)*

**अप्स्वन्तरमृतमप्सु भेषजम्।**

*(ऋग्वेदः - १.२३.१९)*

# एकादशः पाठः

## अलङ्काराः

काव्यशास्त्रे अलङ्काराणां स्थानं अतिमहनीयं वर्तते। अलङ्क्रियते अनेन इति अलङ्कारः, अलङ्करोति इति अलङ्कारः वा इति व्युत्पत्त्या अलङ्कारशब्देन शोभादायकं वस्तुतत्त्वं वा उच्यते। लोके यथा अलङ्काराः भावाकृतिं भूषयन्ति तस्य शोभां वर्धयन्ति, तथैव अलङ्काराः काव्यस्य सौन्दर्यम् अभिवर्धयन्ति।

"अलङ्कृतिः अलङ्कारः" इति व्युत्पत्त्या सौन्दर्यबोध एव अलङ्कार इति। सौन्दर्यबोध एव आलङ्कारिकैः काव्यस्य आत्मा इति निरूपितम्।

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते"**

इति काव्यादर्शग्रन्थे महाकविः दण्डी निरूपितवान्। अर्थात् काव्यशोभाकरः धर्मः अलङ्कारः। अयं च अलङ्कारः द्विविधः-




### १. शब्दालङ्कारः यथा-

शब्दश्रवणमात्रेण यत्र रमणीयता अनुभूयते तत्र शब्दालङ्कारः। **यथा- अनुप्रासः, यमकम्, श्लेषः, वक्रोक्तिः** इत्यादयः।

### शब्दालङ्कारः

### अनुप्रासः

**लक्षणम् -** "एकस्यैव व्यञ्जनस्य अनेकावृत्तिः अनुप्रासः।
अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"।

शब्दानां सादृश्यं यत्र सः अनुप्रासः। 'अत्र शब्दसाम्यं' इत्यस्याभिप्रायः अस्ति यत् शब्दसाम्ये स्वरव्यञ्जनयोः उभयोः अनिवार्यता नास्ति। स्वराणाम् असादृश्येऽपि व्यञ्जनानां सादृश्यं भवति।

**उदाहरणम् -** अयिगिरिनन्दिनि नन्दितमेदिनिविश्वविनोदिनि नन्दनुते।

अत्र 'द' कारस्य 'न' कारस्य च अनेकावृत्तिः भवति। अतः अनुप्रासालङ्कारः।

अथवा – दूरी करोतु दुरितं गौरीचरण पङ्कजम्॥

अत्र "र" इत्यस्य अनेकावृत्तिः भवति।

## २. यमकालङ्कारः

**लक्षणम् -** एकस्यैव शब्दस्य अनेकावृत्तिः यमकः।

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥

**उदाहरणम् -** शारदा शारदाम्बोजवदना वदनाम्बुजे।
सर्वदा सर्वदास्माकं सन्निधिः सन्निधिं क्रियात्॥

यत्र सार्थकयोः परन्तु परस्परं भिन्नार्थकयोः द्वयोः वर्णसंघातयोः क्रमेण आवृत्तिर्भवति तत्र यमकालङ्कारः जायते। यमकशब्दस्य अर्थः युगलं युग्मं वा भवति।

**उदाहरणम् -** नवपलाश-पलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः॥

## ३. श्लेषालङ्कारः

**लक्षणम् -** "श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते" अथवा "अनेकार्थशब्दविन्यासः श्लेषः"।
"नानार्थसंश्रयः श्लेषः"

यत्र वाक्ये पदे वा अनेकार्थाः भासन्ते तत्र श्लेषालङ्कारः।

**उदाहरणम् -** सर्वदो माधवः पायात्

**अन्वयः -** अत्र सर्वदः माधवः रक्षतु इति एकः अर्थः।
सर्वदा माधवः शिवः रक्षतु इति अपरः अर्थः। अतः श्लेषालङ्कारः।

**उदाहरणम् -** उच्छलद्भूरि कीलालः शुशुभे वाहिनीपतिः।

अत्र 'कीलालः' पदं श्लिष्टपदमस्ति। कीलालपदस्य प्रथमः अर्थः जलं द्वितीयश्च रक्तम् अस्ति। वाहिनीपतिः इत्यत्र प्रथमः अर्थः समुद्रः द्वितीयश्च अर्थः सेनापतिः।

**उदाहरणं यथा-** नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजम्
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम्।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम्॥

## ४. अर्थालङ्कारः

अर्थानुसन्धानेन यत्र रमणीयता प्रतीयते तत्र अर्थालङ्कारः। यथा- उपमा, रूपकः, उत्प्रेक्षादयः –अर्थालङ्काराः।

## ५. उपमालङ्कारः

**लक्षणम्** “उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः”। अथवा “प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते”।

## ६. उपमालङ्कारः

उपमानम्, उपमेयम्, साधारणधर्मः, उपमानवाचकशब्दः चेति चत्वारः अंशाः भवन्ति।

१. उपमानम् - येन सह सादृश्यं वर्ण्यते तत् उपमानम्।

२. उपमेयम् - वर्ण्यवस्तु उपमेयम्।

३. साधारणधर्मः - द्वयोः सादृश्यमेव साधारणधर्मः ।

४. उपमानवाचकाः - इव, वत्, सम, तुल्य, यथा इत्यादयः।

**उदाहरणम् -** अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या।

*अथर्ववेदः*

**उदाहरणम् -** कमलमिव चारु वदनम्

**समन्वयः -** अस्मिन् उदाहरणे उपमालङ्कारस्य अंशाः एवं भवन्ति।

**उपमानम्-** कमलम् । उपमेयम् - वदनम्

साधारण धर्मः – चारुत्वम्। उपमानवाचकम् – एव

तथा- “श्रीरामः समुद्र इव गम्भीरः।

“हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते”।

### ७. रूपकालङ्कारः

**लक्षणम्** - "तद्रूपकमभेदो यः उपमानोपमेययोः"।

'रूपयति इति रूपकम्' अर्थात् यत्र उपमानस्य आरोपणम् उपमेये भवति तत्र रूपकम्। उपमानोपमेययोः स्वरूपतः भेदेऽपि अतिसाम्यप्रदर्शनाय काल्पनिकः अभेदारोपो भवति। यथा-

**उदाहरणम्** - ज्ञानामृतं पीत्वा तुष्टः।

अस्मिन् उदाहरणे उपमान-उपमेययोः ज्ञान-अमृतयो अभेदः वर्णितः।

उदाहरणम् - सौजन्यमेव सुवर्णम्।

संसार-विषवृक्षस्य द्वे एव रसवत्फले
काव्यामृत-रसास्वादः संगमः सज्जनैः सह।

### ८. उत्प्रेक्षालङ्कारः

**लक्षणम्** - "भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"।
"सम्भावना स्यादुत्प्रेक्षा"।

यत्र उपमेयम् उपमानत्वेन सम्भाव्यते तत्र उत्प्रेक्षा। यदा प्रकृतस्य (उपमेयस्य) परात्मना (उपमानेन) सह (एकात्मभावस्य) सम्भावना प्रदर्श्यते तदा उपमेय-उपमानयोः एकीभावस्य सम्भावनोत्थितः अलङ्कारः उत्प्रेक्षा। उत्प्रेक्षा शब्दस्य अर्थः सम्भावना एव। उत्प्रेक्षालङ्कारबोधकैः मन्ये, शङ्के, ध्रुवम्, प्रायः, इव, नूनमित्यादिभिः शब्दैः उत्प्रेक्षा द्योत्यते।

व्यज्यते - मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः॥

**उदाहरणम्** - मुखं भूमिगतं चन्द्रं मन्ये।

**विवरणम्** - अत्र मुखं भूम्यागतचन्द्रत्वेन उत्प्रेक्षितम्, चन्द्रः उपमानं मुखम् उपमेयम्। आकाशस्थितः चन्द्र एव भूमिं प्रति आगतवान् वा इति संशयः एव सम्भावना।

**उदाहरणम्** - लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥

### ९. अर्थाऽन्तरन्यासः

**लक्षणम्** - "सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा"॥

"उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।

यत्र सामान्येन विशेषस्य समर्थनम् अथवा विशेषेण सामान्यस्य समर्थनं भवति तत्र अर्थान्तरन्यासः।

### विशेषस्य सामान्येन समर्थनम्

**उदाहरणम्** - "हनूमान् अब्धिमतरत् दुष्करं किं महात्मनाम्" अत्र हनूमतः समुद्रलङ्घनं नाम विशिष्टं कार्यं किं-दुष्करं महात्मनाम् इति सामान्यत्वेन समर्थितं भवति।

### सामान्यस्य विशेषेण समर्थनम्

**उदाहरणम्** - बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।

सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥

अत्र पूर्वार्धगतः सामान्योऽर्थः वृहत्सहायः क्षोदीयानपि कार्यान्तं गच्छति इति द्वितीयार्धगतेन विशेषेण अर्थेन। नगापगाः महानद्या सम्भूय अम्भोधिम् अभ्येति समर्थ्यंत अतः अर्थान्तरन्यासोऽलङ्कारः।

### १०. विभावनालङ्कारः

**लक्षणम्** - "विभावना विना हेतु कार्योत्पत्तिर्यदुच्यते"।

यत्र कारणं न भवति तथापि कार्यस्य उत्पत्तिः जायते तत्र विभावना अलङ्कारो भवति। यथा–

**उदाहरणम्** - शशाम वृष्ट्यापि विना दावाग्निः - आसीद्विशेषा फलपुष्पवृद्धिः।

ऊनं न सत्त्वेष्वधिको बबाधे, तस्मिन् वनं गोप्तरि गाहमाने॥

अत्र वृष्टिकारणं विनाऽपि दावाग्निः फलपुष्पवृद्धिः कार्यस्य उत्पत्तिः भवति अतः विभावना अलङ्कारः।

### ११. समासोक्तिः

**लक्षणम्** - यत्रोक्ताद् गम्यतेऽन्योऽर्थस्तत्समानता विशेषणः।

सा सामासोक्तिरुदिता संक्षेपार्थस्तया बुधैः॥

यत्र कथितः पदार्थतः तत्सदृशः विशेषणशब्दः अन्यार्थम् अभिव्यनक्ति तत्र समासोक्तिः अलङ्कारो भवति। संक्षिप्तत्वात् समासोक्तिः इति बुधैः प्रोक्तम्।

**उदाहरणम् -** श्रुतिसुख-भ्रमर-स्वन-गीतयं कुसुमकोमलदन्तरुचो बभुः।

उपवनान्तलता पवनाहतैः किसलयैः सलयैरिव पाणिभिः॥

अत्र नर्तकीकिसलययोः विशेषणकार्ययोः समत्वात् उपवनान्तलता इति पदेन अप्रस्तुतनर्तक्या अर्थः प्रतीयते अतः समासोक्तिः अलङ्कारः॥

## शब्दार्थाः

| | |
|---|---|
| अलङ्कारः | शोभाकरः |
| प्रचक्षते | वदन्ति |
| अनुप्रासः | तुल्यवर्णविन्यासः |
| यमकः | युग्मभावं प्राप्नोति यः |
| कीलालः | जलम्, रक्तम् |
| उपमानम् | येन सह सादृश्यं वर्ण्यते |
| उपमेयम् | वर्ण्यं वस्तु |
| उत्प्रेक्षा | सम्भावना |
| अञ्जनम् | कज्जलम् |
| अब्धिः | समुद्रः |
| समासोक्तिः | संक्षिप्तम् |

## अभ्यासः

१. **सर्वे प्रश्नाः समाधेयाः -**

(क) अलङ्कारः काव्यशास्त्रस्य किं वर्धकं तत्त्वमुच्यते ?

(ख) उत्प्रेक्षा इति शब्दस्य अर्थः कः ?

(ग) "तद्रूपकमभेदोऽयम् उपमानोपमेययोः" इति कस्यालङ्कारस्य लक्षणम् ?

(घ) श्लिष्टैः पदैरनेकार्थाभिधाने किमुच्यते?

(ङ) "उच्छलद् भूरिकीलालः शुशुभे वाहिनीपतिः" अत्र अलङ्कारः अस्ति?

## २. रिक्तस्थानं पूरयत

(क) काव्यशोभाकारान् धर्मान् .............................. प्रचक्षते ।

(ख) मुख्यतः अलङ्कारस्य भेदः ................................................. विद्यते ।

(ग) शब्दश्रवणमात्रेण यत्र रमणीयता अनुभूयते तत्र .................................. ।

(घ) एकस्यैव शब्दस्य ........................... यमकः ।

(ङ) नानार्थसंश्रयः ............................................. ।

(च) येन सह सादृश्यं वर्ण्यते तत्.........................................।

## ३. प्रदत्तानाम् अलङ्काराणां नामनिर्देशनपूर्वकम् अलङ्कारस्थानं चिनुत-

(क) कमलमिव चारु वदनम्।

(ख) संसारविषवृक्षस्य द्वे एव रसवत्फले।

(ग) काव्यामृतरसास्वादः संगमसज्जनैः सह॥

(घ) मुखं भूमिगतं चन्द्रं मन्ये।

(ङ) हनूमान् अब्धिमतरत् दुष्करं किं महात्मनाम्।

(च) दूरीकरोतु दुरितं गौरीचरणपङ्कजम्।

(छ) उपमालङ्कारस्य अथर्ववेदस्य उदाहरणं लिखत।

## ४. अधोलिखितानाम् अलङ्काराणाम् उदाहरणानि लिखत -

(क) अनुप्रासः ....................... ........................

(ख) श्लेषः ....................... ........................

(ग) रूपकम् ....................... ........................

(घ) समासोक्तिः ....................... ........................

(ङ) उत्प्रेक्षा ....................... ........................

## ५. अधोलिखितालङ्काराणां सोदाहरणं लक्षणानि लिखत।

(क) यमकालङ्कारः ....................... ........................

(ख) अर्थान्तरन्यासः ....................... ........................

(ग) उपमालङ्कारः ....................... ........................

(घ) विभावनालङ्कारः ....................... ........................

(ङ) अर्थालङ्कारः ........................ ........................

(च) शब्दालङ्कारः ........................ ........................

६. **अधोलिखितानाम् अलङ्काराणां परस्परं भेदनिर्धारणं कुरुत।**

(क) उपमारूपकयोः भेदः कः ?

(ख) श्लेषयमकयो भेदः कः ?

(ग) उत्प्रेक्षारूपकयो भेदः कः ?

(घ) उपमाविभावनयोः भेदः कः ?

७. **वस्तुनिष्ठाः प्रश्नाः -**

(क) सौन्दर्यवर्धकं तत्त्वमलङ्कारः उच्यते -

(अ) अर्थस्य (आ) शब्दार्थयोः

(इ) काव्यशास्त्रस्य (ई) सुपः

(ख) उत्प्रेक्षा शब्दस्य अर्थो विद्यते -

(अ) आरोपः (आ) सम्भावना

(इ) तुल्यम् (ई) प्रदर्शनम्

(ग) क्व सूर्यप्रभवो वंशः क्व चाल्पविषयामतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥ अत्र अलङ्कारः-

(अ) उपमा (आ) निदर्शना

(इ) रूपकम् (ई) श्लेषः

(घ) लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। इति कस्य अलङ्कारस्योदाहरणम् -

(अ) अर्थान्तरन्यासस्य (आ) उत्प्रेक्षायाः

(इ) विभावनायाः (ई) उपमायाः

(ङ) सामान्यं वा विशेषो वा तदन्येन समर्थ्यते। ..... इति कस्यालङ्कारस्य लक्षणम् -

(अ) रूपकस्य (आ) अनुप्रासस्य

(इ) अर्थालङ्कारस्य (ई) अर्थान्तरन्यासस्य

## योग्यता-विस्तारः

**समासोक्त्यलङ्कारः**

**लक्षणम् -** परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः

**उदाहरणम् -** लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः।

जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा॥

**निदर्शनालङ्कारः**

निदर्शना अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः।

स्वस्वहेत्वन्यस्योक्तिः क्रिययैव च सापरा॥

**उदाहरणम् -** क्व सूर्यप्रभवो वंशः क्व चाल्पविषयामतिः।

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

# द्वादशः पाठः

## गीतामृतम्

महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता वर्तते। धर्मक्षेत्रे कुरुक्षेत्रे युद्धभूमौ विषादग्रस्तः अर्जुनाय निष्कामकर्मणः ज्ञानभक्तेश्च शिक्षाम् उपदिदेश भगवान् श्रीकृष्णः। अत्र ज्ञानभक्तिकर्मणां समन्वयो विद्यते। निखिललोककल्याणाय भगवान् श्रीकृष्णः अर्जुनमाध्यमेन अमृतमयगीर्भिः समस्तलोकान् उपदिदेश। श्रीमद्भगवद्गीतायाः अमृतमयं ज्ञानं गौरवञ्च आभारतमेव न अपि तु विश्वस्मिन्नपि ज्ञानगौरवयोः चर्चापरिचर्चा दरीदृश्यते। गीताज्ञानपिपासवः जनाः सादरं जालपुटादिना साक्षाद्वा विविधमाध्यमेन गीतामृतमास्वादयन्ति। इयं गीता इतिहासस्यांश एव न अपि तु सर्वासामपि उपनिषदां सारभूतम् एवं वेदान्तदर्शनादिविविधदार्शनिकतत्त्वानाञ्च सारं सरलसुबोधमधुरभाषया च बोधयति। उक्तञ्च -

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**

**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥**

श्रीमद्भगवद्गीतायां न केवलम् आध्यात्मिकज्ञानमेव अपि तु सम्पूर्णजीवदर्शनमेव मुख्यतया निगदितं वर्तते। भगवद्गीतायां जीवनोपयोगिनः अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपैशुनता-अमानित्व-निष्कपटता-शौच-सन्तोष-तितिक्षा-यज्ञ-दान-तप-स्वाध्याय-शम-दम-विनय-दया-श्रद्धा- विवेक-अपरिग्रह-समाधान-क्षमा-धैर्य-अद्रोह-अभय-निरहङ्कारता-कर्म-ज्ञान-भक्ति-आहार-व्यवहार-स्वकर्त्तव्यादीनाम् अतिशयोपयोगितत्त्वानां वर्णनं वरीवृत्यते। विविधानां समस्यानां समाधानाय जीवनस्य कर्तव्यानां यथार्थता विज्ञानाय समाजस्य देशस्य वा विकासाय श्रीमद्भगवद्गीतायाः स्वध्यायम् अध्यापनञ्च अवश्यमेव करणीयम्। श्रीमद्भगवद्गीतायाम् अष्टादशाध्यायाः तेषु सप्तशतं (७००) श्लोकाः विद्यन्ते।गीता मानवजीवने मार्गोपदेशं प्रसारयति, लोकहितं सम्पादयति, लोकजीवने च निःश्रेयसे कल्पते। इदमेव वैशिष्ट्यमालक्ष्य श्लोकोऽयं प्रस्तूयते-

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**

**या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृताः॥**

प्रस्तुतेऽस्मिन् पाठे श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन अर्जुनमाध्यमेन लोकहिताय प्रोक्तानां केषाञ्चन श्लोकाः सङ्गृहीताः। अनासक्तभावेनैव कार्यकरणं गीतायाः परमोपदेशः ज्ञानविज्ञानसमन्वयः निष्कामकर्म अनासक्तभावेन क्रियमाणकर्मणो बन्धनमुक्तित्वं कर्तव्यपालनेन श्रेयः सम्पादनं च सकलमपि प्रतिपादनमतीव गभीरतया विहितमस्ति।

(अनश्वर आत्मा)

**न जायते म्रियते वा कदाचिद् नायं भूत्वा भविता वा न भूयः**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥** *(२/२०)*

**अन्वयः** - अयं कदाचित् न जायते न वा म्रियते (अयं) भूत्वा भूयः भविता न अयम् अजः नित्यः शाश्वतः पुराणः शरीरे हन्यमाने न हन्यते।

(कर्मयोगः)

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**

**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥** *(२/४८)*

**अन्वयः** - हे धनञ्जय ! सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु। समत्वं योग उच्यते।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**

**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥** *(२/४६)*

**अन्वयः** - ते अधिकारः कर्मणि एव कदाचन फलेषु मा कर्महेतुः मा भूः ते सङ्गः च अकर्मणि मा अस्तु।

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥** *(३/२१)*

**अन्वयः** - यत् यत् श्रेष्ठः आचरति तत् तत् एव इतरः जनः (आचरति)। सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते।

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**

**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥** *(१७/१४)*

**अन्वयः** - देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवं ब्रह्मचर्यम् अहिंसा च इति शारीरं तपः उच्यते।

(यज्ञविचारः)

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**

**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवम्॥** *(३/१४)*

**अन्वयः** - भूतानि अन्नात् भवन्ति पर्जन्यात् अन्नसम्भवः पर्जन्यः यज्ञात् भवति यज्ञः कर्मसमुद्भवम्।

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।**

**तस्मात् सर्वगतं ब्रह्म नित्ययज्ञे प्रतिष्ठितम्॥** *(३/१५)*

**अन्वयः** - कर्म ब्रह्मोद्भवं विद्धि ब्रह्म अक्षरसमुद्भवं तस्मात् सर्वगतं ब्रह्म यज्ञे नित्यं प्रतिष्ठितम्।

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।**

**स्वाध्यायज्ञानयज्ञाश्च यतः संशितव्रताः॥** *(४/२८)*

**अन्वयः** - अपरे संशितव्रताः द्रव्ययज्ञाः तपोयज्ञाः योगयज्ञाः तथा च स्वाध्यायज्ञानयज्ञाः यतः सन्ति।

(ज्ञानप्राप्तये उपायाः)

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानेनस्तत्त्वदर्शिनः॥** *(४/३४)*

**अन्वयः** - प्रणिपातेन परिप्रश्नेन सेवया तत्त्वदर्शिनः ज्ञानिनः ज्ञानं ते उपदेक्ष्यन्ति तत् त्वं विद्धि।

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**

**तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥** *(४/३८)*

**अन्वयः** - इह ज्ञानेन हि सदृशं पवित्रं न विद्यते। तत् (ज्ञानम्) स्वयं योगसंसिद्धिः कालेन आत्मनि विन्दति।

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥** *(४/३९)*

**अन्वयः** - श्रद्धावान् तत्परः संयतेन्द्रियः ज्ञानं लभते। ज्ञानं लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति।

(समदर्शनम्)

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**

**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥** *(५/१८)*

अन्वयः - पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि श्वपाके च एव समदर्शिनः भवन्ति।

**(आत्मयोगः)**

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**

**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥** *(६/०५)*

**अन्वयः** - आत्मना आत्मानम् उद्धरेत् आत्मानं न अवसादयेत्। आत्मा एव हि आत्मनः बन्धुः आत्मा एव आत्मनः रिपुः।

**(योगसाधनम्)**

**प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।**

**मनः संयम्य मच्चित्तो युक्त आसीत् मत्परः॥** *(६/१४)*

**अन्वयः** - प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तः मत्परः युक्तः आसीत्।

**(योग्याहारविहारादीनां महत्त्वम्)**

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**

**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥** *(६/१७)*

**अन्वयः** - युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य युक्तस्वप्नावबोधस्य योगः दुःखहा भवति।

**(ओङ्काररूपपरमपुरुषस्य ध्यानम्)**

**ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।**

**यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥** *(८/१३)*

**अन्वयः** - ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः देहं त्यजन् प्रयाति सः परां गतिं याति।

**पिताऽहमस्य माता धाता पितामहः।**

**वेद्यं पवित्रमोङ्कार ऋक्सामयजुरेव च॥** *(९/१७)*

**अन्वयः** - अहम् अस्य जगतः माता पिता धाता पितामहः वेद्यं (वस्तु) पवित्रम् (वस्तु) ओङ्कारः ऋक् साम् यजुः एव च अस्मि।

**ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।**

**ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिता पुरा॥** *(१७/२३)*

**अन्वयः** - ओं तत् सत् इति ब्रह्मणः त्रिविधः निर्देशः स्मृतः तेन ब्रह्मणः वेदाः यज्ञाः च पुरा विहिता।

(विश्वरूपदर्शनम्, आत्मनिवेदनं च)

**किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव।**

**तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते॥** *(११/४६)*

**अन्वयः** - हे सहस्रबाहो ! विश्वमूर्ते ! अहं त्वां किरीटिनं गदिनं च तथा चक्रहस्तं द्रष्टुम् इच्छामि (तस्मात्) तेन एव चतुर्भुजेन रूपेण (युक्तः) भव।

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**

**भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥** *(१८/६१)*

**अन्वयः** - हे अर्जुन ! यन्त्रारूढानि मायया भ्रामयन् ईश्वरः सर्वभूतानां हृद्देशे तिष्ठति।

(गुणत्रयविभागः)

**तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।**

**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥** *(१४/०६)*

**अन्वयः** - हे अनघ ! तत्र अनामयं प्रकाशकं सत्त्वं निर्मलत्वात् (आत्मानं) सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति।

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**

**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥** *(१४/०७)*

**अन्वयः** - हे कौन्तेय ! रागात्मकं रजः तृष्णासङ्गसमुद्भवं विद्धि। तत् देहिनं कर्मसङ्गेन निबध्नाति।

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**

**प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥** *(१४/०८)*

**अन्वयः** - हे भारत ! तमः तु सर्वदेहिनां मोहनम् अज्ञानजं विद्धि तत् (देहिनं) प्रमाद-आलस्य-निद्राभिः निबध्नाति।

**सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।**

**ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥** *(१४/०९)*

**अन्वयः** - हे भारत ! सत्त्वं (देहिनं) सुखे सञ्जयति रजः कर्मणि उत तमः तु ज्ञानम् आवृत्य प्रमादे सञ्जयति।

**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥** *(१४/१७)*

**अन्वयः** - सत्त्वात् ज्ञानं सञ्जायते रजसः लोभः एव च (सञ्जायते) तमसः प्रमाद-मोहौ भवतः अज्ञानं च एव भवति।

**यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।**
**प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः॥** *(१७/०४)*

**अन्वयः** - सात्त्विकाः देवान् यजन्ते, राजसाः यक्षरक्षांसि यजन्ते, अन्ये तामसाः जनाः प्रेतान् भूतगणान् च यजन्ते।

**(नरकस्य द्वारत्रयम्)**

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥** *(१६/२१)*

**अन्वयः** - कामः क्रोधः तथा लोभः इदं त्रिविधम् आत्मनः नाशनं नरकस्य द्वारम् (अस्ति), तस्मात् एतत् त्रयं त्यजेत्।

**(शास्त्रप्रमाणम्)**

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥** *(१६/२४)*

**अन्वयः** - तस्मात् कार्याकार्यव्यवस्थितौ ते शास्त्रं प्रमाणं (अस्ति) शास्त्रविधानोक्तं कर्म ज्ञात्वा (तत्त्वम्) इह कर्तुम् अर्हसि।

**(त्रिविधाहारः)**

**आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥** *(१७/०८)*

**अन्वयः** - आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः (सन्ति)।

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।**

**आहारा राजसस्येष्टा दुःखशोकमयप्रदाः॥** *(१७/०९)*

**अन्वयः** - कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः दुःखशोकमयप्रदाः आहाराः राजसस्य इष्टाः (भवन्ति)

**यातयामं गतरसं पूति पर्युषितं च यत्।**

**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥** *(१७/१०)*

**अन्वयः** - यत् यातयामं, गतरसं, पूति पर्युषितं च, उच्छिष्टम् अपि च अमेध्यं भोजनं, तत् तामसप्रियम् (अस्ति)।

**(मनीषीणां पवित्रत्वम्)**

**यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।**

**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥** *(१८/०५)*

**अन्वयः** - यज्ञः, दानं, तपः, कर्म न त्यज्यं तत् कार्यम् एव। यज्ञः दानं तपः च एतानि मनीषिणां पावनानि (एव सन्ति)।

**(कार्यसिद्ध्यर्थं पञ्चहेतवः )**

**अधिष्ठानं तथा कर्ता करणञ्च पृथग्विधम्।**

**विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥** *(१८/१४)*

**अन्वयः** - अधिष्ठानं, तथा कर्ता, पृथग्विधं करणं च, विविधाः पृथक् चेष्टाः, अत्र दैवं पञ्चमं (भवति)।

**(ईश्वरशरणागतिः शाश्वतसुखोपायः)**

**शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः।**

**न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥** *(१८/१५)*

अन्वयः - नरः शरीरवाङ्मनोभिः न्याय्यं वा विपरीतं वा यत्कर्म, प्रारभते तस्य (एते) पञ्च हेतवः (सन्ति)।

**तमेव शरणं गच्छ सर्वभावेन भारत।**

**तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥** *(१८/६२)*

**अन्वयः** - हे भारत ! (तम्) एव सर्वभावेन शरणं गच्छ। तत्प्रसादात् परां शाश्वतं शान्तिं स्थानं (च) प्राप्स्यसि।

# शब्दार्थाः

| | |
|---|---|
| दोग्धा | दोहनकर्ता |
| शाश्वतः | नित्यम् |
| अजः | अजन्मा |
| आर्जवम् | सारल्यम् |
| पर्जन्यः | वृष्टि, प्रावृट् |
| संशितव्रताः | सम्यक् सम्पादितं व्रतम् अनेन |
| उपदेक्ष्यन्ति | उपदेशं दास्यन्ति |
| विन्दति | लभते |
| संयतेन्द्रियः | इन्द्रियस्य नियमनं कृतं येन |
| अचिरेण | त्वरया |
| समदर्शिनः | समद्रष्टारः |
| रिपुः | अरिः |
| दुःखहा | क्लेशनाशकः |
| वेद्यम् | ज्ञेयम् |
| अनघ ! | हे पापरहित ! |
| देहिनम् | जीवम् |
| अर्हसि | शक्नोषि |
| विवर्धनाः | वर्धितारः |
| स्निग्धाः | चिक्कणम्, मसृणम्, स्नेहयुक्ताः |
| हृद्याः | हृत्प्रियाः, रुचियुक्ताः |
| रस्याः | सरसाः |
| रूक्षः | शुष्कः |
| पर्युषितम् | दूषितम् |

# अभ्यासः

## १. अधोलिखितप्रश्नान् उत्तरत -

(क) महाभारतस्य कस्मात् पर्वणः श्रीमद्भगवद्गीता सङ्गृहीता ?

(ख) श्रीमद्भगवद्गीतायां कति श्लोकाः विद्यन्ते ?

(ग) गीतामृतस्य उपदेष्टा कः?

(घ) श्रीमद्भगवद्गीतायाम् आत्मस्वरूपवर्णनं कतमेऽध्याये विद्यते ?

(ङ) भगवान् श्रीकृष्णः कमुद्दिश्य गीतोपदेशमदत्त ?

## २. संस्कृतभाषया समाधत्त -

(क) 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया' इति श्लोकस्य विषयः कः ?

(ख) आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः इत्यस्यार्थं लिखत ?

(ग) लोकः कमनुवर्तते ?

(घ) कथं पण्डिताः समदर्शिनो भवन्ति ?

(ङ) अन्नसम्भवः कथं भवति ?

(च) गुणत्रयविभागः कस्मिन् अध्याये विद्यते ?

## ३. रिक्तस्थानानि पूरयत -

(क) योगस्थः कुरु ......................... उच्यते॥

(ख) श्रद्धावान् लभते ....................... समदर्शिनः॥

(ग) तत्र सत्त्वं निर्मलत्वात् .................... चानघ॥

(घ) तस्माच्छास्त्रं .................. कर्तुमिहार्हसि॥

(ङ) तमेव शरणं गच्छ ...................... शाश्वतम्॥

## ४. अधोलिखितपदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत।

| | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|
| (क) शाश्वतोऽयम् | ................ + ............... | ......................... |
| (ख) सिद्ध्यसिद्ध्योः | ................ + ............... | ......................... |

| | | | |
|---|---|---|---|
| (क) | ज्ञानयज्ञाश्च | ............... + .............. | ........................ |
| (घ) | चैव | ............... + .............. | ........................ |
| (ङ) | शरणं गच्छ | ............... + .............. | ........................ |
| (च) | रक्षांसि | ............... + .............. | ........................ |

## ५. अधोलिखितपदानां लकार-पुरुष-वचनानि निर्दिशत -

| | लकारः | पुरुषः | वचनानि |
|---|---|---|---|
| अनुवर्तते | ............... | ............... | ............... |
| उच्यते | ............... | ............... | ............... |
| विद्धि | ............... | ............... | ............... |
| उपदेक्ष्यन्ति | ............... | ............... | ............... |
| विद्यते | ............... | ............... | ............... |
| अवसादयेत् | ............... | ............... | ............... |
| आसीत् | ............... | ............... | ............... |
| तिष्ठति | ............... | ............... | ............... |
| अर्हसि | ............... | ............... | ............... |
| बध्नाति | ............... | ............... | ............... |
| दरीदृश्यते | ............... | ............... | ............... |
| गच्छ | ............... | ............... | ............... |

## ६. समुचितं युग्मम् -

| | | |
|---|---|---|
| (क) | अन्नाद्भवन्ति | अन्नसम्भवः |
| (ख) | पर्जन्यात् | भूतानि |
| (ग) | न हि ज्ञानेन सदृशमिह | हृद्देशेऽर्जुन तिष्ठति |
| (घ) | प्रशान्तात्मा | विद्यते |
| (ङ) | ईश्वरः सर्वभूतानां | विगतभिर्ब्रह्मचारिव्रते स्थितः |
| (च) | स्थानं प्राप्स्यसि | न त्याज्यम् |

(छ) यज्ञदानतपः कर्म शाश्वतम्

७. प्रदत्तानां पदानां विग्रहपूर्वकं समासं निर्दिशत -

| | विग्रहः | समासः |
|---|---|---|
| (क) सरलसुबोधमधुरभाषया | ........................... | .................... |
| (ख) ज्ञानयज्ञः | ........................... | .................... |
| (ग) विद्याविनयसम्पन्नः | ........................... | .................... |
| (घ) युक्ताहारविहारस्य | ........................... | .................... |
| (ङ) चक्रहस्तम् | ........................... | .................... |
| (च) तामसप्रियम् | ........................... | .................... |

८. स्थूलपदान्याधृत्य प्रश्ननिर्माणं कुरुत -

(क) प्रेतभूतगणांश्चान्ये यजन्ते **तामसा** जनाः।

(ख) **समत्वं** योग उच्यते।

(ग) **ज्ञानं** लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।

(घ) **प्रमादमोहौ** तमसो भवतु ज्ञानमेव च।

(ङ) तमस्तु **अज्ञानजं** विद्धि।

९. पर्यायपदानि लिखत -

| | | | |
|---|---|---|---|
| श्रेष्ठः | .................. | ज्ञानम् | .................. |
| पण्डिताः | .................. | रिपुः | .................. |
| अनघः | .................. | देहिनाम् | .................. |
| लोभः | .................. | यज्ञः | .................. |
| स्निग्धाः | .................. | गावः | .................. |

१०. अधोनिर्दिष्टानां पदानां प्रकृति-प्रत्ययौ विभजत -

| | प्रकृति | प्रत्ययौ |
|---|---|---|
| (क) भूत्वा | ................... | ....................... |
| (ख) श्रद्धावान् | ................... | ....................... |

(ग) समदर्शिनः ..................... .........................

(घ) संयम्य ..................... .........................

(ङ) द्रष्टुम् ..................... .........................

(च) त्याज्यम् ..................... .........................

**११. रेखाङ्कितानां पदानां कारकविभक्तीं चित्वा कारकसूत्राणि निर्दिशत।**

(क) ब्रह्मचर्यमहिंसा शारीरं तप उच्यते।

(ख) अन्नाद् भवन्ति भूतानि।

(ग) न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

(घ) शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।

(ङ) स याति परमां गतिम्।

## योग्यताविस्तारः

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥

सर्वस्य चाहं हृदि सन्निविष्टो मत्तस्मृतिर्ज्ञानमपोहनञ्च।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेद विदेव चाहम्॥
योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥
जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥
चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुनः।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥
यदक्षरं वेद विदो वदन्ति विशन्ति यद्यत्तयोवितरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥
गीताध्ययनशीलस्य प्राणायामपरस्य च।
नैव सन्ति हि पापानि पूर्वजन्मकृतानि च॥
अहं कर्तुरहं यज्ञः स्वधाहमहमौषधम्।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम्॥

# त्रयोदशः पाठः

## राष्ट्रैक्यबोधकानि तीर्थानि, स्तोत्राणि च

भारतं पुण्यभूमिः अस्ति। एषा ऋषीणां, मुनीनां, सदाचारनिरतानां, पुण्यकर्मणां तपस्विनां च निवास-भूमिरस्ति। एषा वेदानाम्, उपनिषदां, पुराणानां, भगवद्गीतायाः अन्येषां च ऋषिदृष्टानां वाङ्मयविशेषाणाम् उपदेशभूरस्ति। अस्मिन् भारते जन्मप्राप्तिः पूर्वजन्मनः सुकृतस्य पुण्यस्य वा परिपाक एव अस्ति।

अयोध्या, मथुरा, प्रयागः, पुरी, माया, गया, काशी, काञ्ची, सोमनाथः, अवन्तिका, द्वारावती चेति पुण्याः पुर्यः तीर्थक्षेत्राणि इति प्रतिजनं भावना वरीवर्ति। भारतभूमेः चतसृषु दिक्षु चत्वारि धामानि संस्थापितानि सन्ति, येभ्यः सकाशात् धर्मस्य, प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्म इति उपनिषत्तत्त्वं, ब्रह्मसत्यं जगन्मिथ्येति सघोषम् अद्वैतदर्शनस्य प्रचारं प्रसारं च श्रीशङ्करभगवत्पादाः अकुर्वन्। रामानुजाचार्याः श्रीवैष्णवदर्शनस्य, श्रीमन्मध्वाचार्याः द्वैतदर्शनस्य च प्रसारं प्रचारं नानाप्रदेशेषु अकार्षुः। आसेतु-हिमाचलम्, आद्वारिकामणिपुरं प्रतिग्रामं, प्रतिमण्डलं, प्रतिराज्यं च राष्ट्रैक्यबोधकानि तीर्थानि विलसन्ति। तथा हि - भारतवर्षस्य पूर्वस्यां दिशि त्रिपुराराज्यं महाभारतीयकाले ययातिवंशयेन त्रिपुरराजेन शासितम् इति ख्यातं सत् विराजते।

त्रिपुरसुन्दरीदेव्याः शक्तिपीठत्वेन आवासभूमिः राज्यमिदं त्रिपुरसुन्दरीदेवीमहिम्ना मण्डितं त्रिपुरा-नाम्ना अभिधीयते। सुदूरे असमप्रदेशे कामाख्यादेवी जनान् कृपादृष्ट्या रक्षति। मणिपुरराज्यं प्रकृतिरमणीयं सत् महाभारतकालिकेन योद्धा बभ्रुवाहनेन सम्बद्धम्। स बभ्रुवाहनः मणिपुर-राजकुमार्याः चित्राङ्गदायाः अर्जुनस्य च पुत्रः, महान् योद्धा च। वनपर्वतोपवनैः हरितिम्ना च विभूषितयोः अरुणाचल-सिक्किम-राज्ययोः बुद्धभगवतः धर्मपरम्परा वरीवर्ति। उत्कलप्रदेशे पुरीनगरे श्रीजगन्नाथः, सुभद्रा, बलभद्रश्च श्रीमन्दिरे विलसन्ति। तन्निकटे कोणार्के सूर्यमन्दिरे भगवान् सूर्यनारायणो देदीप्यते। झारखण्डप्रदेशे रोगहरो श्रीवैद्यनाथः, पश्चिमवङ्गप्रदेशे दक्षिणेश्वरे कालिघट्टे कालिकादेवी इति तेषु तेषु प्रदेशेषु भगवद्भक्तिपारम्येण जनानाम् आनन्दस्य पराकाष्ठा विलसति। तेषु तेषु स्थानेषु विविधानां देवानां दर्शनं स्तुतिं च भक्ताः कुर्वन्ति, राष्ट्रैक्यभावनाभरिताः देवसान्निध्यं भावयन्ति।

दक्षिणस्यां दिशि आन्ध्रप्रदेशे भगवान् श्रीवेङ्कटेश्वरः पद्मावती च, श्रीशैले मल्लिकार्जुनः, तामिलनाडुप्रदेशे शतशो मन्दिराणि श्रीरङ्गनाथः कावेरी च श्रीरङ्गे, रामेश्वरे रामेश्वरः, मधुरानगरे मीनाक्षी, काञ्चीपुरे कृपाकटाक्षपरिपूर्णा कामाक्षी भगवान् शिवश्च, श्रीवरदराजभगवान् विष्णुः, माता लक्ष्मीः, कैलाशनाथमन्दिरे श्रीशङ्करः, ब्रह्मा, सरस्वती अन्याः वैदिकदेवताः च, कर्णाटके उडुपीश्रीकृष्णः, गोकर्णे श्रीमहाबलेश्वरः, शृङ्गेरौ श्रीविद्याशंकरः, कोल्लूरे च चामुण्डा, महीशूरे महिषासुरमर्दिनी, हम्प्यां विरूपाक्षः विराजते। केरलप्रदेशे गुरुनावूरे श्रीकृष्णः, रुक्मिणी च, पद्मनाभस्वामिमन्दिरे श्रीपद्मनाभः च विराजते। तेषां देवानां समाराधनाम् अर्चनां वन्दनां च भक्ताः कुर्वते।

पश्चिमस्यां दिशि मुम्बादेवी, द्वारिकायां श्रीद्वारिकाधीशः, सौराष्ट्रे श्रीसोमनाथः, राजस्थाने श्रीनाथः, पुष्करे ब्रह्मा, महाराष्ट्रे श्रीलक्ष्मीः, श्रीविट्ठलः, पण्ढरिनाथः, सिद्धिविनायकश्च जनानां मनांसि पावयन्ति, मुदं तन्वन्ति च।

ऋषीन् भृगु - कण्व - अत्रि - अथर्व - अङ्गिरो - वसिष्ठ - देवल - गौतम - शौनक - आत्रेय - अगस्त्य - कश्यप - विश्वामित्र - गृत्समद - वामदेव - जमदग्नि - मेधातिथि - भरद्वाज - दीर्घतमा औदिच्य - वामदेव - दैवोदासि - पराशर - शाक्य - प्रभृतीन् मन्त्रद्रष्टॄन् स्मरामः।

उत्तरस्यां दिशि अयोध्यायां श्रीरामः, वाराणस्यां श्रीविश्वनाथः देवी अन्नपूर्णा च, मथुरायां श्रीकृष्णः, बलरामश्च, काश्मीरप्रदेशे मातावैष्णोदेवी, हिमाचलप्रदेशे ज्वालादेवी, उज्जयिन्यां महाकालः, उत्तराखण्डे देवतात्मा हिमालयः, तदुपत्यकायाः गङ्गा प्रभवति प्रवहति, ततः समीपे प्रवहति यमुना, हिमालये एव बद्रीनाथः, केदारनाथः, ऋषिकेशः, हरिद्वारे हरिः, कनखले शिवः इति परमात्मनः सान्निध्यं जनानां मनांसि पावयति, तारयति च।

सौराष्ट्रे सोमनाथः, श्रीशैले मल्लिकार्जुनः, उज्जयिन्यां महाकालः, ओङ्कारे ममलेश्वरः, परल्यां वैद्यनाथः, डाकिन्यां भीमशङ्करः, सेतुबन्धे रामेश्वरः, दारुकावने नागेशः, काश्यां श्रीविश्वेशः, गौतमीतटे त्र्यम्बकेश्वरः, हिमालये केदारनाथः, महाराष्ट्रे घृष्णेश्वरः इति समग्रे भारते द्वादश ज्योतिर्लिङ्गानि श्रद्धास्थानानि लसन्ति।

आभारतम् एकपञ्चाशत् शक्तिपीठानि विद्यन्ते, तानि च साधनायाः तपसश्च केन्द्राणि सन्ति, प्रवहन्ति च सुमधुरपुण्यजलाः नानानद्यः दिक्षु विदिक्षु च। वयं भारतीयाः ताः नदीः तीर्थानीति नित्यं प्रातः स्मरामः, स्तुमश्च। देवतासान्निध्यं तासु नदीषु वयं पश्यामः। तथा हि-

**गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा**

**कावेरी सरयू महेन्द्रतनया चर्मण्वती वेदिका।**

**क्षिप्रा वेत्रवती महासुरनदी ख्याता गया गण्डकी**

**पूर्णा पूर्णजलैः समुद्र-सरितः कुर्वन्तु नो मङ्गलम्॥** इति

इत्थमेव च व्यासवसिष्ठादीन् महर्षीन् तपोनिष्ठान् प्रातः स्मरामः, स्तुवीमश्च। तथा हि-

**वाल्मीकिः सनकः सनन्दनतरुर्व्यासो वशिष्ठो भृगु -**

**र्जाबालिर्जमदग्निकच्छजनका गर्गोऽङ्गिरा गौतमः।**

**मान्धाता भरतो नृपश्च सगरो धन्यो दिलीपो नलः**

**पुण्यो धर्मसुतो ययातिनहुषौ कुर्वन्तु नो मङ्गलम्॥**

एतेषां संस्मरणेन वयं धन्यान् आत्मनो मन्यामहे।

भारतस्य विविधेषु पुण्यस्थानेषु, वृक्षेषु, नदीषु, पर्वतेषु, समुद्रेषु तीर्थबुद्धिं वयं भजामः। तेषु देवानां दर्शनं वयं कुर्मः, देवसान्निध्यम् अनुभवामः। महेन्द्र - मलय - विन्ध्य - शुक्ति - ऋक्ष - सह्य - हिमालय - रैवतक - पारियात्र - ऋष्यमूक - प्रभृतीन् पर्वतान् देवतासान्निध्यभाजो वयं कीर्तयामः। सीता - तारा - गार्गी - मैत्रेयी - द्रौपदी - सावित्री - अहल्या - चेन्नम्मा - रुद्राम्बा - शारदा - मन्दोदरी - अहल्याबाई - दुर्गावती - लक्ष्मीबाई - अरुन्धती - अनसूया - निवेदिता - प्रभृतयः मातृमूर्तयः, देवतारूपाः भारतीयान् अस्मान् सदा वात्सल्येन करुणया च नित्यम् अनुगृह्णन्ति, संवर्धयन्ति च।

श्रीकृष्ण - भीष्म - ध्रुव - व्यास - वसिष्ठ - शुक - बलि - पृथु - शिबि - मनु - बुद्ध - कम्बु - श्रीराम - प्रह्लाद - नारद - जनक - भरत - अगस्त्य - कौण्डिन्य - पाणिनि - जिनेन्द्र - दधीचि - भार्गव - वाल्मीकि - बल्लभ - निम्बार्क - विक्रम - कपिल - कणाद - चरक -सुश्रुत - भास्कर - वराहमिहिर - आर्यभट्ट - विश्वकर्म - हनूमन्मार्कण्डेय - हरिश्चन्द्र - दशरथ -त्यागराज - धन्वन्तरि - रन्तिदेव - गोरक्षनाथ - पतञ्जलि - आण्डाल - आलवार - श्रीयाज्ञवल्क्य - श्रीरविदास - श्रीचैतन्य - श्रीज्ञानदेव - श्रीतुलसीदास - श्रीसायण - श्रीमहीधर - श्रीउव्वट - श्रीमाधव - श्रीदयानन्द - श्रीशिवाजि - श्रीकृष्णदेवराय - श्रीललितादित्य - श्रीअभिनवगुप्त - श्रीमहाराणाप्रताप - प्रभृतीन् पुण्यश्रवणकीर्तनान् स्मारं स्मारं धन्यान् आत्मनो मन्यामहे। आभारतम् ईदृशं देवसान्निध्यवैविध्यं विचिन्त्य तत्रस्थायाः संस्कृतेः दिव्यायाः परम्परायाश्च अनुभवं वयं प्राप्नुमः।

श्रीरामायणम्, श्रीमहाभारतं च राष्ट्रस्यास्य गौरवशिखरम् आर्षकाव्यद्वयम्। तत्रानेकानि स्तोत्राणि यथा च श्रीरामायणे आदित्य-हृदयस्तोत्रम्, गङ्गास्तुतिः, श्रीमहाभारते श्रीमद्भगवद्गीता, विष्णुसहस्रनामस्तोत्रम्, श्रीमद्भागवते वेदस्तुतिः, गोपीगीतम्, नारायणकवचम्, पद्मपुराणे श्रीमृत्युञ्जयस्तोत्रम् इत्यादि। पूर्वं वर्णितानां पुण्यक्षेत्राणां, देवतानां च सभक्ति गुणकीर्तनाय अनेके आचार्याः समाजस्य पथदर्शकाः स्तोत्राणि संरचितवन्तः। तानि च यथा - भगवत्पादैः श्रीशङ्कराचार्यैः प्रणीतानि स्तोत्राणि- अन्नपूर्णास्तोत्रम्, वेदसारशिवस्तोत्रम्, दक्षिणामूर्तिस्तोत्रम्, शिवपञ्चाक्षरस्तोत्रम्, शिवानन्दलहरी, सौन्दर्यलहरी, कनकधारास्तवः, अच्युताष्टकम्, मोहमुद्गरस्तोत्रम्, देव्यपराधक्षमार्पणस्तोत्रम्, लिङ्गाष्टकम्, शिवमानसपूजास्तोत्रम्, जगन्नाथाष्टकम्, दशावतारस्तोत्रम्, श्रीहयग्रीवस्तोत्रम्, श्रीवेङ्कटेशस्तोत्रम्, श्रीनृसिंहस्तोत्रम्, श्रीगङ्गाष्टकम्, शिवताण्डवस्तोत्रम्, महिशासुरमर्दिनीस्तोत्रम् इत्यादीनि जनमनांसि हरन्ति।

इत्थमेव पण्डितराजो जगन्नाथः गङ्गालहरी, करुणालहरी-अमृतलहरी-लक्ष्मीलहरी-सुधालहरी इति लहरीः पञ्च प्रणिनाय, ताश्च जनमनांसि हरन्ति।

**नमस्ते शारदा देवि काश्मीरपुरवासिनि।**
**त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे॥ १॥**
**यया विना जगत्सर्वं मूकमुन्मत्तवत्सदा।**
**या देवी वागधिष्ठात्री तस्यै वाण्यै नमो नमः॥ ७॥**

परम्परया प्रतिदिनं प्रातःस्मरणीया शारदास्तुतिः प्रसिद्धिं भजते। इत्थमेव ननापुराणेषु क्षेत्राधिपतेः क्षेत्रमाहात्म्यस्य अपि दृश्यते। तेषां चिरात् पुराणेषु श्रुतानां स्तोत्राणां पाठेन जनाः आनन्दं प्राप्नुवन्ति, तेषु तेषु क्षेत्रेषु देवतासान्निध्यम् अनुभवन्ति च। एतेन च अस्माकं राष्ट्रस्य ऐक्यभावः चिरस्थायी बोभवीति राष्ट्रगौरवं च अभिवर्धते।

## शब्दार्थः

| | |
|---|---|
| ऋषिदृष्टानाम् | ऋषिभिः दृष्टानाम् |
| प्रतिमण्डलम् | प्रतिजनपदम् |
| मण्डितम् | विभूषितम् |
| तन्निकटे | तस्य समीपे |

| | |
|---|---|
| रोगहरः | रोगान् हरति यः |
| मन्त्रद्रष्टॄन् | मन्त्राणां दर्शकान् |
| पराकाष्ठा | चरमावस्था |
| आभारतम् | समग्रभारते |
| विदिक्षु | उपदिक्षु |
| ख्याता | प्रसिद्धा |
| स्मारं स्मारम् | स्मृत्वा स्मृत्वा |
| देवसान्निध्यम् | देवानां सान्निध्यम् |
| प्रणिनाय | व्यरचयत् |
| देदीप्यते | अतिशयेन दीप्यते |
| बोभवीति | पौनःपुन्येन भवति |
| विरूपाक्षः | भगवान् शिवः |
| तन्वन्ति | विस्तारयन्ति |
| मुदम् | हर्षम् |

## अभ्यासः

१. **अधोलिखितप्रश्नान् उत्तरत -**

(क) तपस्विनां निवासभूमिः का विद्यते ?

(ख) अद्वैतदर्शनस्य प्रचारं प्रसारं के अकुर्वन् ?

(ग) श्रीवेङ्कटेश्वरः पद्मावती च कुत्र विराजेते ?

(घ) राष्ट्रस्यास्य गौरवशिखरे काव्ये द्वे के ?

(ङ) आभारते कति शक्तिपीठानि विद्यन्ते ?

२. **पूर्णवाक्येन प्रश्नान् समाधत्त -**

(क) श्रीवैष्णवदर्शनस्य द्वैतदर्शनस्य च प्रचारं कौ अकुरुताम् ?

(ख) त्रिपुरसुन्दरीदेव्याः आवासभूमिः (प्रदेशः) इदानीं केन नाम्ना प्रसिद्धा ?

(ग) उत्कलप्रदेशे श्रीमन्दिरे के विलसन्ति ?

(घ) भारतस्य पश्चिमस्यां दिशि स्थितानां देवानां नामानि लिखत ?

(ङ) लक्ष्मीलहरी इति केन विरचिता ?

## ३. रिक्तस्थानं पूरयत -

(क) आसेतु हिमाचलं .................. तीर्थानि विलसन्ति।

(ख) एषा ऋषीणां ......................... भूमिरस्ति।

(ग) गङ्गासिन्धु ....................... कुर्वन्तु नो मङ्गलम्॥

(घ) वाल्मीकिः सनकः .......................... कुर्वन्तु नो मङ्गलम्॥

(ङ) नमस्ते शारदा ......................... विद्यादानं च देहि मे॥

(च) पूर्वं वर्णितानां .................... पथदर्शकाः स्तोत्राणि संरचितवन्तः॥

## ४. सन्धिविषयकं कार्यं ससूत्रं विधीयताम् -

| | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|
| (क) राष्ट्रैक्यभावना | .................. + .................. | ............................। |
| (ख) पर्वतोपवनैः | .................. + .................. | ............................। |
| (ग) नो मङ्गलम् | .................. + .................. | ............................। |
| (घ) गर्गाङ्गिरा | .................. + .................. | ............................। |
| (ङ) तन्निकटे | .................. + .................. | ............................। |
| (च) बलभद्रश्च | .................. + .................. | ............................। |

## ५. कोष्ठकात् चित्वा प्रकृति-प्रत्ययौ विवेचयत -

वेदि + क + टा, सरस्वत् + ङीप्, पूर् + क्त, नद + ङीप्, प्र-चर् + घञ्, मन्त्रदृश् + तृच्

| | प्रकृतिः + प्रत्ययः |
|---|---|
| (क) प्रचारः | ............ + ............। |
| (ख) नदी | ............ + ............। |
| (ग) सरस्वती | ............ + ............। |
| (घ) मन्त्रद्रष्टा | ............ + ............। |

(ङ) वेदिका ............ + ............।

(च) पूर्णा ............ + ............।

६. **समुचितं स्थानमन्दिरयोः मेलनं विधत्त -**

| | |
|---|---|
| (क) मथुरायाम् | माता वैष्णवदेवी |
| (ख) कोणार्के | विरूपाक्षमन्दिरम् |
| (ग) वङ्गप्रदेशे | घृणेश्वरः |
| (घ) मधुरानगरे | कालिकादेवी |
| (ङ) हम्प्याम् | सूर्यमन्दिरम् |
| (च) कश्मीरप्रदेशे | श्रीकृष्णः |
| (छ) महाराष्ट्रे | मीनाक्षीमन्दिरम् |

७. **अधोलिखितपदानां कारकविभक्ती निर्दिशत -**

(क) कोणार्कसूर्यमन्दिरे भगवान् सूर्यनारायणो देदीप्यते।

(ख) श्रीरङ्गे श्रीरङ्गनाथः कावेरी च वर्तेते।

(ग) वयं भारतीयाः ताः नदीः तीर्थानीति नित्यं प्रातः स्मरामः।

(घ) कुर्वन्तु नः मङ्गलम्।

(ङ) श्रीभगवत्पादैः श्रीशङ्कराचार्यैः प्रणीतानि स्तोत्राणि।

(च) श्रीमद्भागवते वेदस्तुतिः विद्यते।

८. **प्रयोगपरिवर्तनं कुरुत -**

(क) भारतं पुण्यभूमिः अस्ति।

(ख) विविधानां देवानां दर्शनं भक्ताः कुर्वन्ति।

(ग) वामदेवादीन् मन्त्रद्रष्टॄन् वयं स्मरामः।

(घ) चतुर्दिक्षु स्थितानां मन्दिराणां शोभा देदीप्यते।

(ङ) महर्षीन् तपोनिष्ठान् प्रातः स्तुवीमः।

९. **अधोलिखितानां क्रियापदानां संयोज्य व्यवहारविषयकाणि वाक्यानि विलिखत -**

(क) विराजते ..................................................।

(ख) वरीवर्ति ......................................................।

(ग) विलसन्ति ..................................................।

(घ) प्रणिनाय ......................................................।

(ङ) सन्ति ..........................................................।

१०. पुण्यभूमेः भारतस्य चतुर्दिक्षु स्थितानां मुख्यानां मन्दिराणां देवानां च अष्टौ नामानि लिखत।

११. राष्ट्रैक्यबोधकानि तीर्थानि स्तोत्राणि च इति पाठस्य भावार्थं विशदतया संस्कृतभाषया मातृभाषया आङ्ग्लभाषया वा लिखत।

# चतुर्दशः पाठः

## स्वस्थवृत्तम्

धर्मार्थकाममोक्षाणाम् आरोग्यं मूलमुत्तमम् इत्युक्त्या जानीमः यत् चतुर्विधपुरुषार्थ-सिद्धये आरोग्यस्य महिमा कियान् वर्तते इति। वस्तुतः यस्य कस्यापि मानवस्य स्वपरिवारस्य पालनपोषणाय समाजस्योत्थानाय विकासाय च अग्रेसरैर्जनैस्सहैव सर्वेषां निरामयत्वम् आवश्यकम्। तथैव विश्वस्मिन् समृद्धस्य, विकासशीलस्य, अग्रगामिनः, सर्वोत्कृष्टस्य च राष्ट्रस्य निर्माणाय तथा सुखशान्तिमयस्य निरामयस्य जीवनस्य यापनाय स्वस्थवृत्तम् आवश्यकम्। परोपकाराय धनाद्यर्जनाय च प्राथम्येन मानवजीवने स्वास्थ्यं सर्वाधिकं सहाय्यं भवति। स्वास्थ्याभावे सामान्यकार्यकरणाय चिन्तयितुमपि न शक्यते। राष्ट्रविकासस्य महतः कार्यस्य चिन्तनं कुतो वा ? अतः अस्माकं शरीरस्य स्वास्थ्यलाभार्थं भारतीयाः महर्षयः अनेकान् ग्रन्थान् प्रणिन्युः। येषां ग्रन्थानाम् अध्ययनेन वयं शारीरिकमानसिकबौद्धिकरूपेण हृष्टाः पुष्टाः सन्तः परिवारस्य समाजस्य राष्ट्रस्य च सर्वतोभावेन कार्यं साधयितुं शक्नुमः। अतः निरामयजीवनयापनाय स्वस्थवृत्तम् इति पाठः प्रस्तूयते।

### ब्राह्मे मुहूर्ते उत्थानम्

ब्राह्मे मुहूर्त उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः।
सर्वमेव परित्यज्य शरीरमनुपालयेत्॥

*अष्टाङ्गसंग्रहः, सूत्रस्थानम् - ३.३*

### जिह्वानिर्लेखनम्

जिह्वामूलगतं यच्च मलमुच्छ्वासरोधि च।
दौर्गन्ध्यं भजते तेन तस्माज्जिह्वां विनिर्लिखेत्॥

*चरकसंहिता, सूत्रस्थानम् - ५.७५*

### तैलगण्डूषः

मुखवैरस्यदौर्गन्ध्यशोफजाड्यहरं सुखम्।
दन्तदार्ढ्यकरं रुच्यं स्नेहगण्डूषधारणम्॥

*सुश्रुतसंहिता, चिकित्सास्थानम् - २४.१४*

## व्यायामः

शरीरायासजननं कर्म व्यायाम उच्यते।
लाघवं कर्म सामर्थ्यं दीप्ताग्निर्मेदसः क्षयः।
विभक्तघनगात्रत्वं व्यायामादुपजायते॥

*अष्टाङ्गसंग्रहः, सूत्रस्थानम् - ३.६२,६३*

## तैललेपः तैलमर्दनं च

खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः।
सद्य एवोपशाम्यन्ति पादाभ्याङ्गनिषेवनात्॥

*चरकसंहिता, सूत्रस्थानम् - ५.९०*

नित्यं स्नेहार्द्रशिरसः शिरः शूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च॥
इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चाननम्।
निद्रालाभः सुखं च स्यात् मूर्ध्नि तैलनिषेवनात्॥

*चरकसंहिता, सूत्रस्थानम् - ५.८१, ८२*

## स्नानम्

नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते।
तस्मात् कायविशुद्ध्यर्थं स्नानमादौ विधीयते॥

*बृहत्पाराशरस्मृतिः - २.९४*

उष्णेन शिरसा स्नानमहितं चक्षुषः सदा।
शीतेन शिरसा स्नानं चक्ष्यमिति निर्दिशेत्॥

